ने इति फलमूलेनान्तर्याभेदात् जिज्ञासानुपपत्तिरित्यर्थः ननु गमनस्य ग्रामः कर्मत्वन्यायेन फलमिति भेदात्कर्मै
वफलमित्युक्तं तत्राह फलेति क्रियान्तरेण भेदेऽपि ज्ञायाः फलविषयत्वात्कर्मैवफलमित्यर्थः ननु ज्ञानावग
त्योरैक्याद्दोषतदवस्थ इत्यत आह ज्ञानेनेति ज्ञानवृत्तिः अवगतिस्तत्फलमिति भेद इति भावः अवगतेरपि जाध
ते अवगतेः फलत्वस्फुटत्वं इति चस्येति द्विधा ह्योक्तहेतुमाह तिः शोचेति वीजमविद्यादिदृष्टं स्यानर्थस्य तन्नाशक
अत एवानुगमाच्चय नेवाव्यमानि भूलनिन्नथेन रम्यायाः अतयत हि जिज्ञास्यत्व हुतेति सत्यमत्तमेव ब्रह्मत्वेति
ज्ञासाकर्मकं तद्दर्शयति नच कर्मेण षष्ठी शेषे हेतुत्वेनानुग्राह्यभवति तस्मात् ब्रह्मण इति कर्मणि षष्ठी ज्ञातुमिच्छा
जिज्ञासा अवगतिपर्यन्तं ज्ञानसन्वाच्याया इच्छायाः कर्मफलविषयत्वादिच्छाया ज्ञानेन हि प्रमाणेनावगन्तु०
मिष्टं ब्रह्म अवगतिर्हि पुरुषार्थो निःशेषसंसारबीजाविद्याद्यनर्थनिवर्हणात्तस्माद् ब्रह्म जिज्ञासितव्यं
बास्याद्युदिप्रसिद्धेः५ तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वेति जिज्ञासितव्यं यद्यप्रसिद्धं नैव शक्यं जिज्ञासितुमिति इत्यादि अस्ति तावद् ब्रह्म नित्यशुद्धबुद्ध
त्वादित्यर्थः अवयवार्थमुक्त्वा सूत्रवाक्यस्यार्थमाह तस्मादिति ग्रन्थस्य मुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं
ब्रह्मस्वविचारस्तदर्थं तत्त्वार्थे न संभवति अथातः शब्दाभ्यामधिकारिणः साधितत्वात् तेन ब्रह्मज्ञानाय विचारः कर्तव्य
इत्यर्थः इति सूत्रेयोर्वर्णिकं प्रथमवर्णिके ... विषयादिसंभवा
संभवाभ्यां शास्त्रारम्भसंदेहे पूर्वपक्षमाह तत्पुनरिति पुनःशब्दो वर्णिकान्तरद्योतनार्थः यदि वेदान्तविचारात्प्रागेव ब्र
ह्मज्ञाने तर्हि ज्ञाताज्ञानरूपविषयत्वं नास्ति अज्ञानाभावेन निवृत्तिरूपप्रयोजनस्याप्यभावादिति न विचारयितव्यं अथाज्ञातं
केनापि तर्हि तदृशेन विचारः कर्तुं न शक्यते अज्ञातत्वे ह्यज्ञाततायोगात् तथा च ब्रह्मज्ञानार्थं विचारात्मकशास्त्रे
णावेदान्तेषु प्रतिपादकतायोगात् तत्प्रतिपादनरूपसंबन्धोनास्तीति ज्ञानानुत्पत्तेः फलमपि नास्तीत्यनारम्भणीय
मित्यर्थः आपाततः प्रसिद्धाविद्यादिलाभात् आरंभणीयमिति सिद्धान्तयति अस्तीत्यादिना प्रसिद्धं तावदित्यर्थः प्र
सिद्धत्वमाह तदेव नाविद्यादप्रसिद्धिपरत्वात् ॥

सूत्रार्थमपप्रस्तौति तस्मादिति तं प्रत्यग्रस्तत्वेन विषयादिसम्भवात् अधिकारार्थत्वादधिकारित्वाभावादानन्तर्यासिद्धाच विषया
दिसम्भवाच्च वेदान्तविषयामीमांसारभ्यतेति विचारणीयत्वेन विशेषितात्परतकर्मतन्त्रानुष्ठानप्रकारेणनियमः सा
तिः अथ यस्यायारभ्यत्वमर्थः ननु तत्रैव विचारस्य विषयादाभावान्नदारंभः कथं सूत्रार्थ इत्यतआह ब्रह्मेति ब्रह्मतत्त्वकोलिति
हारविचारं तत्त्वविज्ञानं न केवलं ब्रह्मैवेति भावः एवं प्रथमसूत्रस्य चत्वारोऽर्थाः आत्मान चत्वारि चैव दर्शितः सूत्र
स्य चानेकार्थत्वं भूषणं नन्विदं सूत्रं शास्त्राद्दृष्टिरिति शास्त्रमारभ्यतीति अतन्तर्भावाच्च आधेतस्य इत्यतआह सूत्रस्य
वैयाने द्वितीये तस्यारंभकत्वाच्च नच तत्पत्मेवारंभकं तस्यान्तेवान्तरितमारभ्यतादन नचारंभकत्वं पयोगमकमुच्यते अव
णविधिनारब्धसिद्धत्वाच्छास्त्रमेवशास्त्रारंभप्रतिपादयतीत्यर्थादन विधिर्वेदान्तानामेवकृत्स्नं वेदार्थप्रधानमुखेनह
दिमनवद्यं प्रथमसूत्रस्यामात्र प्रथमसूत्रेणशास्त्रारंभमुखेन शास्त्रमारभ्यमाणं श्रवणाद्यधिकरणयोगमागतिवक्तृत्वके
तयोति ब्रह्मेति समन्वयनस्तस्यानावबोधात विचारः कर्तव्यइत्यतनस्तत्त्वविचार्यत्वात्तात्पर्यप्रमाणादिविचारणप्रतिज्ञा
स्वेपि ब्रह्मप्रमाणं ब्रह्मयुक्तिविचारादिविशिष्टविचारणादिविशेषणब्रह्मतत्त्वविलाकर्तृमशक्यत्वानन्तरूपतानादौल
त्यागवत्कर्मान्तरमसम्भवनीत्यादिद्वयं तत्त्वनपृथग्द्वेवलक्षणसमन्वयवर्तत्वात् किं लक्षणमिति किमाद्येननास्य वल
क्षणमित्यर्थः अतेयपाणां स्थानादितत्वपरस्मान्तिः लक्षणप्रतिवेदान्तानां स्पष्टब्रह्मलिङ्गानांतस्यप्रतिसमन्व
तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणानिः श्रेयसप्रयोजनाप्रस्तू
यते ब्रह्मजिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः जन्माद्यस्य यत इति
योके अतिसंसार्यध्यायपादसंगतयः तथाहि यतोवाइमानिभूतानिजायन्त इत्याद्यावाक्यविषयः तत्किं ब्रह्मणो लक्षणं न किं
वेतिसंदेहे तच्छ्रवणादेव ब्रह्मस्वरूपासिद्धाशंकासिद्धिः फलंसिद्धान्तेतत्सिद्धिरिति भेदः यद्यपितत्पूर्वाधिकरणेऽपि फलमे
वफलमिति कृत्वापृथक्फलवक्तव्यं तदुक्तं आहोपचापवाद्यब्रह्मलक्षणाकर्मणि प्रयोजनं वक्तव्यं यत्रकृत्वापवादित
इतितयापिस्पष्टार्थमुक्तमितिमन्तव्यं यत्पूर्वाधिकरणसिद्धान्तेन पूर्वपक्षस्तत्रापवादिकी संगतिः प्राप्तिसन्देहौ विना
तत्र तवक्तीतिप्राप्तंजन्मादेर्जगद्धर्मत्वेनब्रह्मलक्षणतायोगात् नच जगदुपादानत्वसतिकर्तृत्वं लक्षणमितिवाच्यं कर्तृके
पादानत्वेदृष्टान्ताभावेनानुमानाप्रवृत्तेः तथाचतस्यप्रमाणतः अतःकेवलक्षणासिद्धेः किमनुमानेनेतिवाच्यं अनुमानमपश्च
मनुग्राहकत्वेनतदभावेनश्रुतेरपिवाक्यार्थासिद्धेः नचजगत्कर्तृकत्वमुपादानत्ववायनेकलक्षणमितिवाच्यं कर्तृमा
त्रस्योपादानाद्विन्नत्वस्यलोकगत्वहस्तुतः पिदिन्द्रियादिभिप्रमेयत्वादुक्तमात्रस्यानुमानस्यापतिष्ठितस्यातीन्द्रियार्थस्याप्ते
आयेभ्यात् अप्रमेयतयानिर्दोषं ... आत्मकार्यस्य सम्भावादिदृष्टान्तेनसमावयितुंशक्यत्वात्तदेवलक्षणमितिनि
ष्टोतयति जन्माद्यस्य यतइतीति अत्रजगज्जन्मस्थितिलयकारणत्वं लक्षणमनिषध्यते तस्माग्रेकृतिश्वेतपिकर

तत्र स्थूलसूक्ष्मक्रमेण विप्रतिपत्तीरुपन्यस्यति देहमात्रमित्यादिना शास्त्रज्ञानशून्याः प्राकृताः वेदबाह्यमतान्युक्त्वा
तार्किकादिमतमाह अस्तीति सांख्यमतमाह भोक्तेति किमात्मा देहादिरूपः उत तद्भिन्न इति विप्रतिपत्तिकोटित्वेन देहे
न्द्रियमनोबुद्धिशून्यान्युक्त्वा तद्भिन्नोऽपि कर्ता भोक्ता वेति विप्रतिपत्तिकोटित्वेन तार्किकसांख्यमते उपन्यस्याकर्तापि
स्वाद्भिन्नो न वेति विवादकोटित्वेन योगिमतमाह अस्ति तद्व्यतिरिक्त इति निरतिशयसत्त्वं सर्वज्ञेश्वरः स
र्वज्ञत्वादिसंपन्न इति योगिनो वदन्तीति भेदकोटिमुक्त्वाभेदकोटिमाह आत्मा स भोक्तुरिति भोक्तुर्जीवस्यात्मा स
ईशः स ईश्वर आत्मा स्वरूपमिति वेदान्तिनो वदन्तीत्यर्थः विप्रतिपत्तीरुपसंहरति एवं बहव इति विप्रतिपत्तीनां
प्रपंचो निरासश्च विवरणोपन्यासे द्रष्टव्यः सुखबोधाय यतितव्ये परमाते तत्र युक्तिवाक्याभासाः सिद्धान्तिनः जीवात्र
ह्मैव ब्रह्मात्मत्वात् असदवतिरेक्यादिपुरुषः तत्त्वमसीत्यादिश्रुतेश्चाबाधितत्वात् सन्तः न अन्येषां देहादिरात्मा इत्यपरोक्षं चानन्ता

देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः इन्द्रियाण्येव चेतनान्यात्मेत्यपरे मन
इत्यन्ये विज्ञानमात्रं क्षणिकमित्येके शून्यमित्यपरे अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे
भोक्तैव केवलं न कर्तेत्येके अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् आत्मा स भोक्तुरित्यप
रे एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्तस्तत्राविचार्य यत्किंचित्प्रतिपद्यमानो
निःश्रेयसात्प्रतिहन्येतानर्थं चेयात्

व्यतिरेकेणाहं दृष्टिवदित्यादियुक्त्याभासाः स
वा एष पुरुषोऽन्नरसमयः इन्द्रियसंवादे च प्राणादयः तेऽहं वदमुक्ताः मन एवाचक्षुर्विज्ञानमयः असदेवेदमग्र आसी
त्कर्ता बोद्धा मन्तेत्यादयः आत्मानमन्तरो यमयतीति वाक्याभासवाक्यानीति विभागः देहादिर्नात्मा भौतिकत्वा
टी॰ त्वादि॥ द्घटवदित्यादिन्यायैर्वाक्यैश्च योऽभासः इति स्फुटं तत्त्वाभासं विवक्षते ननु सन्तु विप्रतिपत्तयस्तथापि कस्मात्पन्नेन मुहान
दाय्यमाणं स्पष्टार्थः सत्स्विति किं तत्र सर्वेवाचारं भोगत्वं तत्र आह तत्राविचार्येति ब्रह्मात्मैक्यज्ञानाद्देवमुक्तिरिति
वक्तव्याति: मतान्तराश्रयणेन दम्भाद्वान्मोचकादिः किं चात्मानमन्यथाज्ञानात्तमापन्नः स संसारान्धकूपे पतेत् अयं तमः
प्रविशन्तीत्येके चात्महनो जना इति श्रुतेः योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चौरेणात्मा
पहारिणेति वचनाच्चेत्यर्थः अतः सर्वेषां मुमुक्षूणां निःश्रेयसफलाय वेदान्तविचारः कर्तव्य इति ॥

ब्र० भा
प्र०
१५

देहो जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति यास्कमुनिकाक्तं एतत्तस्य मूलं किं तत्राह यतो ति या
स्कमुनिः किल महाभूतानामुत्पन्नानां स्थितिकाले भौतिके घटादौ जन्मादिषट्कमुपलभ्य निरुक्तवाक्यं चकार तन्
मूलीकृत्य जन्मादिषट्ककारणलक्षणं सूत्रार्थ इति ग्रहणे सूत्रकृता अस्य लक्षणस्य गृहीते किं न महाभूतानां ल
क्षणमुक्तमिति शंका स्यात्सा माभूदिति यस्य कस्य जन्मादयस्तस्य पदोक्तम् इत्यर्थः यदिति कृतमस्या विस्मृतिमूलमिति
महाभूतजन्मादिकमर्थस्तदितरस्य साम्यं तिरेव स्मृतम् सम्मतं किमेतया रीत्या नानि कृतेनेति भावः यदि जगतो ब्रह्मातिरिक्त
कारणं स्यात् तदा ब्रह्मलक्षणमयुक्तं जाति व्याप्त्यादि दोषः स्यात् तस्य निराकरणाय लक्षणसूत्रे ब्रह्म विना जगज्जन्मादिकं न
संभवति कारणान्तरासंभवादिति युक्तिः सूचिता सा तर्कपादे विस्तरेणाख्यास्यते अधुनासद्दोषणांतरं दर्शयति न च

स्मादुर

यास्कपरिपठितानां न जायते स्तीत्यादीनां ग्रहणे तेषां जगतः स्थितिकालेपि संभाव्यमानत्वात् मूलकारणाद्वत्
ति स्थितिना उत्पन्नजगतोत्तरजीनां स्वस्थितिप्रदेशे तन्मात्रेपीति यैत्पत्ति अस्त्यस्तैत्वेव स्थितिः प्रलयश्च तेन च प्रो
नयथा केवि शेषणास्य जगतो यथोक्त विशेषणमीश्वरस्य कार्यन्तः प्रधानादचेतनात् दणुभ्यो वा अभावात्स्वभावा
तो वा भ्यादिकं संभावयितुं शक्यं नच स्वभावतो विशिष्टदेशकालनिमित्तानामिहोपादानात् ॥

24

अनेककर्तृकेत्यादिना नामरूपाभ्यां व्याकृतस्य मादीनां च तनुर्भेजनादि विषयोऽन्ततो अविद्यामूलात्प्रधानपरमाण्वोः संसारिणश्च
निराश्रयत्वादिति परमाणूनामचेतनानां स्वतः प्रवृत्त्ययोगात् जीवानां प्रयत्नानामनियमेनानुमानात्स्वर्गेऽस्मा
सिद्धे तेषां परेषामभावात् जगदारम्भकत्वासंभव इति भावः स्वभावादेव विचित्रं जगदिति लोकायतस्तत्राह नच
म ति जगतो स्वतः संभावयितुं शक्यमित्यन्वयः किं स्वयमेव स्वस्मादेवेतीति सभावः अनेकारणानपेक्षत्वं ना
यः आत्माश्रयात् न द्वितीयस्तत्राह विशिष्टेति विशिष्टानां नियमाधारणानि देशकालनिमित्तानि तेषां कार्या
र्थिभिरुपादीयमानत्वात् कार्यस्य कारणानपेक्षत्वं न युक्तमित्यर्थः अनपेक्षत्वे धान्यार्थिनामपि विशेषवर्षादिकाले १५
बीजादिनिमित्तप्रवृत्तिर्न स्यादिति भावः

प

सूत्रं व्याचष्टे जन्मेत्यादिना बहुव्रीहौ तद्गुणसंविज्ञानार्थः सर्वं वाक्यार्थस्याव्ययीभावार्थस्य विशेषणमिति यत्र विशेषणं द्रवदतत्संविज्ञानवः तद्गुणसंविज्ञानादौ

तिनत्रयस्यैकवचनयोनि तत्समाहारेण जन्मस्थितिभंगसमाहारविशेषणात्मना च जन्मनः समासार्थैकदेशस्य गुणत्वेन संविज्ञा

२३ नं यस्मिन्बहुव्रीहौ स तद्गुणसंविज्ञानोर्थः तत्रयजन्मकारणतद्गुणेति अस्य विधानमयुक्तं स्थितिलयकारणादि त्वेन तान

प्रमाणत्वात् ब्रह्मणि समन्वयात् अतो जन्मस्थितिभंगोनिरूपितानि त्रीणि कारणत्वानि मिलितान्येव लक्षणमिति समासत्रेसमाह

रोधोनिस्तरीतिपप जन्मादित्वे जन्मनः कथं तावत् संसारस्थानादित्वादिमतआह जन्मनश्चेति मूलक्रमभवस्तुगमाचादिहेता

त्वात् तदेव सूत्रकृता जन्मनआदित्वमुक्तमित्यर्थः इदमः प्रत्यक्षार्थमात्रवाचित्वमाशंक्योपक्षिप्तसर्वकार्यवाचित्वमाह अस्येति

विषयादिनानात्मनित्यत्वान्न जन्मादिसंबंध इत्यत आह अस्येति विषयमाद्यमहत्त्वभूतानाम् जन्मादिसंबंधोवक्ष्यते इति भावः ननु तत

तोजन्मादेर्वाऽऽसंसर्गभावान्न लक्षणमित्याशंक्य तत्कारणत्वं लक्षणमिति यच्छब्दार्थमाह यत इति यच्छब्देन संबंधान्मनर्न्तमा

नंदरूपं व्याख्याते अनंतरंप्रवेतिनिर्णितत्वात् तथा च स्वरूपलक्षणसिद्धिरिति मन्तव्यं पदार्थमुक्त्वा पूर्वं सूत्रे स्पष्टस्य पदानुषंगेन

वि २ जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः जन्मस्थितिभंगं समासार्थः जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च श्रुतिनिर्दे वस्तुतःतापेतं

शस्तावत् यतो वा इमानि भूतानि जायन्त इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् वस्तुवृत्तमपि जन्मना लब्धसत्ता

कस्य धर्मिणः स्थितिप्रलयसंभवात् अस्येति प्रत्यक्षादिप्रमाणसंनिधापितस्य धर्मिण इदमा निर्देशः षष्ठी जन्मा

दिधर्मसंबंधार्था यत इति कारणनिर्देशः अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनिय

तदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेः कारणा

द्भवति तद्ब्रह्मेति वाक्यशेषः अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम् ॥

तत्र व्याख्यातृत्वे हेतुत्वस्य कारणार्थमाह अस्येत्यादिना कारणस्य सर्वज्ञत्वादिसंभावनार्थानि जगतो विशेषणानीति यथा कुंभ

कारः पूर्वं कुंभशब्दाभिधेयं निकर्षिते बुद्धावालिख्य तेन नामरूपेण तु कुंभं करोति तथा परमेश्वरोऽपि प्रकटयति

व्यापरस्य कारणस्य पि स्वतिलंबितनामरूपात्मना व्याकरोतीत्यनुमीयते इति सर्वज्ञत्वसिद्धिः नामरूपाभ्यामिति इत्थंभावे तृतीया अत्र

कार्यं चेतनकर्तृकं कार्यत्वात् कुंभवदिति प्रधानस्य चेतनत्वनिरासः हिरण्यगर्भादिजीवजन्यत्वनिरासार्थमनेकेति अस्य देशा

नवेक्षादेश्च प्रमाणपक्षयोः कर्तृभोक्तृसंयुक्तस्य मत्तः परतरं नान्यदिति श्रुतिरीश्वरविषया इति स्तुत इ

सूक्ष्मदेहोपाधिर्हिरण्यगर्भो जीवानां कार्यत्वेन न तत्कारणमुपपादितत्वान्न जगत्कारणत्वमित्यर्थः कारणस्यासर्वज्ञत्वं संभावयति प्रति

नियतेति प्रतिनियतदेशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः सर्गांतरे क्रियाफलस्य भेदरूपदेशाः दे

वानामूर्ध्वकाल उत्तरायणादिकालो निमित्तं शुक्लकर्मजस्यैव फलभोगः स्वर्गादौ द्वारेण वक्ष्यन्ते तथा चप्रथमसेवा

प्रतिपत्तेरिति २

यथा कश्चिद्गान्धारदेशेभ्योऽभिनद्धाक्षमानीय विजने त्यक्तः केनचिन्मुक्तबन्धस्तदुक्तमार्गग्रहणसमर्थः पण्डितः स्वयं तर्ककुश
लो मेधावी स्वदेशानेव प्राप्नुयादेवमेवेहापि विद्याकामादिभिः स्वरूपानन्दाच्छादकाविद्याभिनाहनेन संसारे क्षिप्तः केनचिद्दयापरव
शेनाचार्येणानादिसिद्धं संसारित्वं किं तु तत्त्वमसीत्युपदिष्टस्वरूपः स्वयं तर्ककुशलश्चेत्स्वरूपं तेन नीतो ब्रह्मात्मतां प्राप्नोतीति श्रुतिः तेऽस्याः
पुरुषमतिरूपतर्कापेक्षां दर्शयतीत्याह पण्डित इति आत्मनः श्रुतेरिति मर्थः ननु श्रवणमननाद्यपेक्षा न युक्ता वेदार्थत्वा
द्धर्मवत् किं च श्रुतिलिङ्गवाक्यादय एवापेक्षिता इत्यत आह नेति जिज्ञास्यधर्मे इव जिज्ञास्ये ब्रह्मणि श्रुत्यादय एव अनुभवो
ब्रह्मसाक्षात्कारो विद्वदनुभवः आदिपदान्मननिदिध्यासनयोर्ग्रहः नन्वहेतुमाह अनुभवेति भूतार्थब्रह्मज्ञानस्य सा
क्षात्कारावसानत्वापेक्षणे न प्रमाणभूतसिद्धब्रह्मगोचरत्वेन साक्षात्कारफलकत्वसंभवात् नहि धर्मे मननाद्यपेक्षा युक्ता
धर्मे तु नित्यपरोक्षे साक्षात्कारस्यानपेक्षितत्वात् संभवाच्च श्रुत्यादीनामेव मात्रमनुष्ठेयापेक्षितत्वाद्धर्मस्य श्रुत्यन्त

पण्डितो मेधावीत्याद्युपाख्याने वाक्योपपत्तेः एवमेवेहाचार्यवान्पुरुषो वेदेति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयतीति नधर्मजि
ज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किं तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणमनुभ
वावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्य कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामा
ण्यं स्यात् पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म यथाश्वेन गच्छति
पद्भ्यामन्यथा वा न वा गच्छतीति तथातिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति उदिते जुहोति अनुदिते
भेतापवक्ष्यति श्रुत्यादिनिर्णयोपयोगित्वेनापेक्षितत्वेन मननादयः अनुपयोगाद्धर्मे निरपेक्षः शब्दः श्रुतिः शब्दस्यार्थप्रका
शनसामर्थ्यं लिङ्गं पदयोगे इतरपदाकाङ्क्षा वाक्यं अन्योन्यापेक्षं प्रधानवाक्यं प्रकरणं क्रमप्रदितानामर्थानां क्रमपठिते
यथाक्रमं संबन्धः स्थानं यथैन्द्राग्न्यादयः इष्टयो दर्शक्रमेणाम्नाता [illegible] दशमन्त्राः
शुन्धध्वं दैव्याय कर्मण इत्यादयस्तत्र प्रथमेष्टौ प्रथमस्य मन्त्रस्य विनियोगः क्रमाद्गृह्णीयं संज्ञासामान्यसमाख्यया आध्वर्यवं संज्ञकानां नाम
ज्ञानामाध्वर्यवसंज्ञके कर्मणि विनियोग इति विवेकः एवं तावद्ब्रह्म मननाद्यपेक्षं वेदार्थत्वाद्धर्मवदित्यनुमाने साध्यत्वेन
धर्मस्यानुभवायोग्यत्वमनपेक्षितानुभवत्वं चोपाधिरित्युक्तमुपाधिव्यतिरेकाद्ब्रह्मणि मननाद्यपेक्षत्वं चोक्तं तत्र यदि वेदा
र्थमात्रेण ब्रह्मणो धर्मेण साम्यं तया चेत्तर्हि कर्तृसाध्यत्वविधिनिषेधविकल्पोत्सर्गापवादाद्यं ब्रह्मणि धर्मवत्स्यादिति वि
परीतव्यापकमाह पुरुषेणादिना पुरुषकृत्यधीनात्मलाभत्वमितिपूर्वपदं ब्रह्माच्च धर्मस्य प्रामाण्यमित्यन्वयः
धर्मस्य साध्यत्वे लौकिककर्मदृष्टान्तेन स्फुटयति कर्तुमिति लौकिकवदित्यर्थः दृष्टान्तं स्फुटयति यथेति दार्ष्टान्तिकमाह

पूर्वोक्तसर्वज्ञत्वादिविशेषणमीश्वरं भूतकार्याद्युत्पत्त्यादिकं न संभवतीति भाष्ये एककर्तारं विना कार्यं नास्तीति व्यतिरेक उक्तः तेन
यत्कार्यं तत्सकर्तृकमिति व्याप्तिर्दर्शिता येन एतदेव व्याप्तिज्ञानं नयातिथ्येककर्तारं साधयतीति किं च नित्यानां कर्मणां विमुखस्यापि यत
देवेति एतदेवानुमानमेव साधनेन कृतिरिति मन्यत इति योऽज्ञत्वात् अयथावाच्यत्वाप्तिज्ञानमेव कृत्स्नत्वनुयायादेकस्मिन्मात्रेणत्वनात्म
त्वमतं सदनुमानं स्वतंत्रमिति मन्यत इत्यर्थः सर्वज्ञत्वमादिश्याह्रार्थः यद्वा व्याप्तिज्ञानसहकृतमनसैव तत्स्वरूपमेवानुमानमन्यत
इत्यर्थः तत्र यो विभागः व्याप्तितात्तत्वातः कर्तास्तीत्यस्तित्वसिद्धिः पश्चात्तत्कर्ता सर्वज्ञः जगत्कारणत्वान्निरेकेण कुल
लादिवदिति सर्वज्ञत्वसिद्धिर्लक्षणे इति अत्र मन्यत इत्यनुमानस्याभासत्वं सूचितं तथाहि अंकुरादौ तावज्जीवः कर्ता न
भवति जीवाङ्कुरस्यादृष्टवदचेतनत्वनियमात् अन्यः कर्ता नास्त्येवेति व्यतिरेकेण निश्चयात् यत्कार्यं तत्सकर्तृकमिति व्याप्ति
नासिद्धिः लक्षणलिंगकानुमानेन बाधः अशरीरस्य जनयितृत्वायोगात् एतस्मिन्ननुमाने जन्यमिति व्याप्तिविशेषेण निश्चितत्वासिद्धेः
नाभावनिश्चयात् तस्मादीश्वरसिद्ध्यर्थं प्रत्यक्षसंभावनार्थत्वेनानुमानस्य किंमात्रं तत्त्वं तत्रेति भावः नान्यदनुपकृत्यैवानुमा
यदेवानुमाने संसारिव्याप्तिरिति केवलानुमानसिद्धिः साधनमीश्वरकारणत्वेनाभिमन्यते नाप्तिसाधितदेवोपमसंजननादिसूत्रे अनुमानमेव
नवेदान्तवाक्य [illegible] न्यायानुपात्तत्वात् वेदान्तवाक्यानि निर्दिश्य विचार्यन्ते वाक्यार्थविचारणाध्यवसा
नानिर्वृत्ता हि ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता [illegible] वाक्यानि
[illegible] सत्यं तु वेदान्तवाक्योपजनितो नन्वादि
कारणवादिषु तदर्थग्रहणद्रढिम्ने यानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत् न निवार्यते श्रुत्यैव च सहायत्वेनत
न्तर्भावमभिप्रेत्य भवदीयस्त्वत्कृतानुमानस्य वेदोपजनकत्वादिति वैशेषिकः केस्याभ्युपगमात् श्रोतव्यो मन्तव्य इति श्रुतिः
शंकते नन्विति ततो मन्यत इत्यनुमानस्याभासोक्तिरयुक्तेति भावः यदि श्रुतीनां स्वतंत्रमानत्वं न स्यात् हि ननु समन्व
यादिसूत्रादिना नानाशाखानामर्थसमन्वयकृते न विचारः तेन तस्माद्धेतुनस्तत्त्वज्ञानं श्रुतिविचारार्थत्वाज्जन्मादिसूत्रेऽपि श्रुतिरेव वाक्यान्
अन्यानि विचार्यन्ते नानुमानमिति परिहरति नेति किंच सूत्रेण [illegible] स्यारंभः स च नानुमाना
त्तैरोपनिषदमिति निश्चयते श्रुतेनानुमानेन विचार्यमित्याह वाक्यार्थेति वाक्यस्य तदर्थस्य च विचाराद्यदध्यवसानं तात्पर्यनि
श्चयः प्रमेयसंभवनिश्चयः तेन जाता ब्रह्मावगतिः मुख्यार्थं भवतीत्यर्थः संभवादाद्यभावः तन्नु किमनुमानमपेक्षितमे
वनेत्याह सत्स्विति विमतं सप्रतिज्ञानिमित्तोपादानकं विमतं चेतनप्रकृतिकं कार्यत्वात् स्वस्त्रादिवदिति अनुमानेनस्यात्त
त्त्वदार्ढ्याय स्थितमित्यर्थः दार्ढ्यं संशयविपर्याससनिवृत्तिः मतमात्रेति श्रुत्यर्थस्य केवलसंभावनीयत्वमित्यर्थः ॥

भा.
प्र.
२

इन्द्रियाग्राह्यत्वं कुतस्तत्राह स्वभावतश्चेति परोक्षविज्ञाननियामकत्वं भवितुमर्हतीति ऋते ब्रह्मलोकरूपात्हितीनत्वाच्चेत्यर्थः इन्द्रियाग्राह्य-
त्वमित्याभिप्रायः किं तस्मादित्यत आह सतिह्रीति तन्मात्रत्वेतिशेषः इदं कार्यं ब्रह्मजमिति आभिप्रायं ब्रह्मणोनो इन्द्रियतामत्र
भवतीत्यर्थः द्वितीयकारणस्य सूत्रावयवकारणस्य ब्रह्मत्वकल्पिलिङ्गिनात्वानुमानकामित्याह कार्यमात्रमिति सम्बन्धग्रहणस्माच्च
निमित्तेर्गाजन्यकारणं ब्रह्मेति निश्चयालाभसमस्मान्नत्राभावश्रुतिरेव प्रापानेन विचारणीयानुमानतर्कानन्वादि निसाधा
न्यहारासम्बन्धेवहुस्मरणः स्वप्रकार्यात्मकत्वादित्रेतार्थसम्भावनार्थं प्रमाणेनयाविचार्यमित्युपसंहरति तस्मादिति एत
सूत्रस्य विषयवाक्यं दर्शयति किं पुनरिति इहत्र सूत्रेण लक्षणार्थत्वेन विचारयितुमिष्टं वाक्यं किमित्यर्थः अत्र हि यद्य
समस्ते विशिष्टाधिकारिणोऽयस्य विचारं प्रतिज्ञाय ब्रह्मजातकामस्य द्वितीयसूत्रे लक्षणमुच्यते तथेव श्रुतावपि भृगुदत्त्र

स्वभावतो विषयविषयाणीन्द्रियाणि न ब्रह्मविषयाणि सति हीन्द्रियविषयत्वे ब्रह्मण इदं ब्रह्मणा सम्बद्धं कार्यमिति गृ
ह्येत कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा सम्बद्धं किमन्येन केनचिद्वा सम्बद्धमिति न शक्यं निश्चेतुं तस्माज्जन्मादि
सूत्रं नानुमानोपन्यासार्थं किं तर्हि वेदान्तवाक्यप्रदर्शनार्थं किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम् १३
भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति तस्मा एतत्प्रोवाच यतो वा इमानि भूतानि जायन्ते येन जा
तानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति तस्य च निर्णयवाक्यमानन्दाद्ध्येव खल्विमानि भू
तानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्तीति तथान्यान्यप्येवंजातीयकानि वाक्यानि नि
त्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि

26

ब्रह्मजातकामस्य ज्ञानाकारणोपलक्षणानुवादेन ब्रह्म ज्ञाप्यत इति श्रौतार्थक्रमानुसारित्वं सूत्रस्य दर्शयितुं तस्मोपक्रमं
वाक्यं पठति भृगुरिति अधीहि स्मार यत्तदुपदिशेत्यर्थः अत्रत्येनैकत्वविवक्षितेति नानात्वेब्रह्मत्वविधानायोगात् य
त्प्रधानकारणं तदेकमित्यवान्तरवाक्ये यदेककारणं तद्ब्रह्मेति बोधककारणात्तदेकं ब्रह्मेति वा महावाक्यमिति भेदः किं
तर्हि स्वरूपलक्षणमित्याशङ्क्य वाक्यशेषान्निर्णीतो यतः शब्दार्थः स नपुंसकानानन्दस्त्वाह तस्येति यः सर्वज्ञः सादत
द्व्यत्वनामरूपमन्वेवजायते विज्ञानमानन्दं ब्रह्मेत्यादिश्रुत्यन्तरीयवाक्यान्यपि विषय इत्याह अन्यान्यपीति एवंजाती
यकत्वमेवाह नित्येति तद्वेवं सर्वेषां मुमुक्षावासलक्षणहेतुवाक्यानि जिज्ञास्यब्रह्मणि समन्वितानि न प्रियाणि तानीति
सिद्धं २ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १०
श्रीरामसर्ववेत्तारं वेदवेद्यमहं भजे ॥

धर्मसमायस्त्वमुपचारात्तत्र विपर्ययाद्भेदमाह विपरीतेति विप्रतिषेधाच्च विकल्पाद्व्यस्य धर्मसाधये अर्थवन्तः साधकाश्च भवन्तीति तेऽत्र
स्याप्यसिद्धिरित्यर्थः यत्नेन तन्मूलं पिबेदित्यत्र योगिनिविशेषाः श्रीहरिमिश्चैवैवायज्ञे नेतिसंशयविनो विकल्पः य इत्यत्र इत्यायो वैकल्पिकः उ
हितानुदितहोमयोर्व्यवस्थितविकल्पः न हिंस्यादिति स्मृतेः अग्नीषोमीयं पशुमालभेतेत्यादेः तथा हवनीयादनुदिते होमस्मृतेः अस्य ५३
स्यापदेषु देजस्तो नीतिर्विवादः इति विवेकः एतेनाप्यपि स्मृतिनेत्रे छायानिवारयति नतिमादिनाम नवस्तुविषयत्वादित्येतेन इव
स्वेवैनेवघटः एतेनैतिप्रकारे विकल्पः आहितनाग्निवेतिस्मृता स्वरूपविकल्पः ननु वस्तुन्यथात्माद्देवादिनामग्नितनाशी
त्वादिविकल्पाद्वयतेतत्राह विकल्पनामिति अग्नित्वादिकोटिस्मरणेऽपुरुषबुद्धित्वेन लाभतः स्यादितमात्रासंशयविपर्ययपवि
कल्पानप्रमाणरूपत्वस्तत्त्वार्थः अयंभावः धर्मेहिपञ्चायथार्थत्वादयते तत्र यानथाकर्तृयावत्तत्त्वायाथाम्यं पुरुषबुद्ध्यपेक्षविकल्पः सर्वे
प्रमाणरूपा एव भवन्तीति न त्वाम्नायप्राप्ते सर्वे विकल्पा यथार्थान्मृतीति नत्राणां मितिविरुद्धत्वप्रमाह नेति यदि सिद्धवस्तुज्ञानम
पिसाध्यज्ञानवत् पुरुषबुद्ध्यपेक्षं स्यात्तेन तदसिद्धे विकल्पः यथार्थाः स्युः न सिद्धवस्तुज्ञानं पौरुषं किन्तर्हि प्रमाणवस्तुजन्यं त
विप्रतिषेधात्तथार्थं वेनः स्युर्विकल्पेनात्मास्यावाद्ध्य नतु वस्तु वैवमस्ति नास्तीति वा विकल्प्यते विकल्पनास्तु पु
रुषबुद्ध्यपेक्षाः न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं किन्तर्हि वस्तुतन्त्रमेव तन्न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषो
वेति तत्त्वज्ञानं भवति तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानं स्थाणुरेवेति तत्त्वज्ञानं वस्तुतन्त्रत्वात् एवम्भूतवस्तुवि
षयाणां प्रमाणानां वस्तुतन्त्रं तत्र वंसतिविषयज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात् ननु भूतवस्तुत्वे ब्रह्मणः
न प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणार्थकेव प्रमाणमेदिया विषयत्वे सर्वे पायदाते॥ ५२
याचवस्तुन एकरूपत्वादेकमेवज्ञानं प्रमाणमन्ये विकल्पा अयथार्था एवेत्यर्थः अत्र दृष्टान्तमाह नहि स्थाणाविति स्था
णुरेवेत्यवधारणे सिद्धे सर्वे विकल्पा अयथार्था भवन्तीत्यर्थः तत्र यद्वस्तु तत्र ज्ञानं तद्यथार्थं पुरुषतन्त्रं तत्रेति विभजते
तत्रेति स्थाणाविति अर्थः स्थाणौ पुरुषो वा यत्तदादिदर्शितिदर्शितं एवमिति प्रकृतमाह नैवं सतीति सिद्धे यज्ञानप्रमाणस्य
वस्तुधीनत्वे सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव यथार्थं न पुरुषतन्त्रं भूतार्थविषयत्वात् स्थाणुज्ञानवदित्यर्थः अतः सा
ध्यसर्वे विकल्पाः पुंतन्त्रा न सिद्धार्थ इति वेलतन्त्वापनम्भसाम्य ब्रह्मणः इतिमननादपपत्तेः सिद्धमिति भावः ननु तर्हि ब्रह्म
प्रयत्नादिगोचरं धर्मविलक्षणत्वात् तथा च जन्मादिसूत्रे जन्मादिकारणानुमानं विचार्यं सिद्धार्थत्वसमानत्वात् नवाकृतिः
सिद्धार्थत्वस्याप्रमाणत्वे न तद्विचारस्य निष्फलत्वादिति शङ्कते नात्विति प्रमाणान्तरविषयत्वमेव ब्रह्मणि मितिकृत्वा प्रमा
णान्तरस्यैव विचारसामान्यविशेषः अत्र प्रत्यक्षपरीक्षणः किं यत्कार्यं तद्धेतुजन्यमित्यनुमानं ब्रह्म साधकं किं वा यत्कार्यं तदन्त
कारणकमिति नाद्यः आप्यसिद्धेरित्याह नेति ब्रह्मणः इन्द्रियाग्राह्यत्वात्सम्बन्धग्रहणासम्भवात् न प्रमाणान्तर

वेदः स्वविषयादधिकार्थज्ञानवक्तृकः प्रमाणवाक्यत्वात् व्याकरणादिवदित्यनुमानान्तरं तत्र व्याप्तिमाह यद्वदिति
विस्तरः शाखाधिकं अनेनार्थतो न्यूनत्वं वदन्कर्तृज्ञानस्याधिक्यं च प्रतिदर्शयति चार्थवादाधिकं वेदे अत्रैव योजना य
था व्याकरणादिप्रमाणं सम्भवति तथा ततः शास्त्रादधिकार्थज्ञानादिति प्रसिद्धं यथा पाणिनिमाथुरादीनामेकदेशार्थो यस्य तदपि व्याक
रणादिशास्त्रं तेभ्य एवाधिकार्थज्ञातृभ्यः सम्भवति यद्यस्यार्थं सम्पिण्डितं तदधिकार्थज्ञातृसम्भवति तदस्य समस्तस्यापीति अतः य
स्मान्महतो परिच्छिन्नात्कलनात्सन्तायोनेः सकाशादनेकशाखोपादिविविधविद्यास्य वेदस्य प्रकृष्टनिश्वासवत् अप्रयत्नेनै
व सम्भवः तस्य सर्वज्ञत्वं सर्वशक्तित्वं चेति किमु वक्तव्यमिति तत्र वेदस्य पौरुषेयत्वे लोकानिराकार्यं श्रुतिस्य निश्वसि
त पदार्थमाह अप्रयत्नेनेति प्रमाणान्तरेणार्थज्ञानप्रयासं विना निमेषमात्रादिरूपेणार्थः अत्रानुमानेनयः स
र्वज्ञः सिद्धः तस्य सर्वज्ञत्वं तदाश्वासः पाणिन्यादिवद्वेदकर्तुरधिकार्थज्ञानवत्तामात्रसाधने न तत्र ज्ञानस्य वेदहेतुत्वं निश्वसित

सततोऽधिकतरविज्ञानः १९

यद्यपि हि सत्यार्थं शास्त्रं यस्मात् प्रकृष्टविशेषात् सम्भवति यथा व्याकरणादिपाणिन्यादेस्तथैकदेशार्थसमर्पितोऽप्यधिक
तरविज्ञानः इति प्रसिद्धं लोके किमु वक्तव्यं अनेकशाखाभेदभिन्नस्य वेदस्य तिर्यङ्मनुष्यदेवानामसाधारणविभागमहतो
ऽस्य वेदराशेः सर्ववेत्ता नाकस्मात्प्रयत्नेन वलीलायोनेः पुरुषनिश्वासवदायासाकारतो भूतयोनेः सम्भवः
अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः तस्य महतो भूतस्य निरतिशयसर्वज्ञत्वं सर्वशक्तित्वं चेति
अथवा यदयं कश्चिद्वेदादिशास्त्रयोनिः कारणं प्रमाणमस्य अस्तियोग्यवायव्यरूपाधिगमे शास्त्रादेव प्रमाणात्

अतिविरोधाद्वेदज्ञानमात्रेण प्रवृत्तवद्वेदकर्तृत्वोपपत्तेश्च इत्यादिविशेषः अपेक्षितापरापेक्षस्य स्वतन्त्रस्य कर्तृत्वेदानुपूर्वी स्वयमेव
स्मृत्वा तथैव कल्पादौ ब्रह्मादिषु आविर्भावयत्र नान्यज्ञानत्वान्तरं अर्थमप्यवज्ञानीयतया ज्ञानातीति सर्वज्ञत्वं न वयं अथवा ब्रह्म
णोलक्षणान्तरं प्रमाणजिज्ञासायां वर्णकान्तरमाह अथवेति लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलत्वसंगतिः ते
नौपनिषदं पुरुषमिति ब्रह्मणो वेदैकवेद्यत्वं ब्रूते न वेति संशये कार्यलिङ्गेनैवलाघवान्कर्तुरेकस्य सर्वज्ञस्य ब्रह्मणः सिद्धेर्न
ब्रूत इति प्राप्ते वेदप्रमाणकत्वाद्ब्रह्मणो न प्रमाणान्तरवेद्यत्वमिति सिद्धान्तयति शास्त्रयोनित्वादिति प्रसंगादयोद्धान्तोदत्वा १८
टी३ वस्तुस्वरूपयाथात्म्यनिर्णीहकेकार्यत्वेषोऽग्रहेणानि अतएव इति नह्याचष्टे यथाक्रममिति सर्वज्ञः पूर्वोत्तरपक्षयुक्तिरूपं शास्त्रं
हत्य अत्र पूर्वपक्षेऽनुमानस्यैव विचार्यतासिद्धिः फले सिद्धान्ते वेदान्तानामिति भेदः अनुमानादिनं ब्रह्मसिद्धिः सर्वस्य चेत्प्रमाणा
विरहात् किं च विचित्रप्रपञ्चस्य प्रासादादिवदनेककर्तृकत्वबाधात्रलाघवावतारः न च सर्वज्ञस्यैकस्य कर्तृत्वेऽनेकत्वं संभवएकत्वा

वृत्तानुवादेन संगतिं वदन् सूत्रमवतारयति जगदिति चेतनस्य ब्रह्मणो जगत्कारणत्वोक्त्या सर्वज्ञत्वमर्थान्मतं तत्सूत्रकृ
ता चेतनस्य प्रेक्षापूर्वकत्वात् सा च ब्रह्मणः सर्वकारणत्वात् ज्ञेयोपलब्धा सन्ननु यथा कुलाल इति स्थिते न देवार्थिकं सर्वज्ञत्वं
प्रधानादिनिरासाय वेदकर्तृत्वेन तद्दृढयन्नाहेत्यर्थः हेतुद्वयस्यैकार्थसाधनत्वादेकविषयत्वमेवानन्तरसंगतिः यद्वा वेद
स्यानित्यत्वाद्ब्रह्मणः सर्वहेतुता नास्तीत्याशङ्क्य संगत्या वेदहेतुत्वमुच्यते अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वे
दः सामवेदोथर्वाङ्गिरस इत्यादिवाक्यं विषयः तत्किं वेदहेतुत्वेन ब्रह्मणः सर्वज्ञत्वं साध्यते उत नेति संदेहः नत्वाकरण
त्वे वेदस्य पौरुषेयत्वेनाल्पप्रमाणं स्यात् तेन न ब्रह्मणः सार्वज्ञ्यं तावत्साधयति इति पूर्वपक्षे जगद्धेतोर्ब्रह्मणः सर्वज्ञत्वासिद्धिः फलं
सिद्धान्ते तत्सिद्धिः अस्य वेदस्य तावन्महापुरुषलिङ्गस्य वेदकर्तरि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसंगतयः
एवमाद्यपादेष्वाद्यसूत्रान्तेष्वपि संगतयो ज्ञेयाः वेदो हि सर्वार्थप्रकाशनशक्तिरूप एव लभ्यते सा तदुपादानब्रह्मणानशक्तिपूर्वकात्तद्
त्वाप्रकाशनशक्तित्वात् कार्यगतशक्तिर्नाद्यप्रदीपशक्तिवदिति वेदोपादानत्वेन ब्रह्मणः स्वसर्वज्ञत्वे वाच्य

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव दृढयन्नाह । शास्त्रयोनित्वादिति ३ महत ऋग्वेदादेः शा
स्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म न
हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोस्ति ॥

प्रकाशनसामर्थ्यरूपं सर्वज्ञत्वं सिध्यति यद्वा यथार्थोपकारः सर्वज्ञमन्तरा न वेदकर्तृत्वमिति तथापि विचित्रगुणमायासह
योगाद्भूतानां तत्त्वप्रकाशविभ्रमः परमेश्वरः स्वकृतसर्वकृत्स्नीयकर्मसु मनीयकमेवं तं वेदराशिं तद्यथा अयुक्तम्
त्वान्नैव करोतीति न वेदस्य पौरुषेयतायत्यं यथा च सर्वज्ञवाक्यत्वान्न वाक्यस्य प्रमाणं तत्र पौरुषेयताज्ञैयो
गप्रग्रन्थसाम्ये तावद्वेदकर्ता वेदविदन्तर्भाविसर्वज्ञत्वानन्तरीयकत्वाज्ञानानीति सर्वज्ञत्वमिति सिद्धं तथापि शास्त्रेति शा
स्त्रमितिहेतुत्वाद्ब्रह्मणः सर्वज्ञं सर्वकारणं चेति संगतिः तथानुसारेण सङ्गयोजनाभिप्रायपदानि व्याचष्टे महत इति हेतोः
सर्वज्ञत्वसिद्ध्यै वेदस्य विशेषणानि तत्रार्थतो महत्त्वमाह अनेकेति तद्वाक्यस्य महत्त्वं स्पष्टमाह शब्दमात्रोपलक्षणाक्षं
इतिमत्त्वाद् अनेकेति पुराणन्यायमीमांसाधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाणि षडङ्गानीति दश
विद्यास्थानानि वेदार्थज्ञानहेतवस्तैरुपकृतस्येत्यर्थः अनेन मन्त्रादिभिः परिष्कृतत्वेन वेदस्य प्रामाण्यं सूचितं अ
बोधकत्वाभावादपि प्रामाण्यमित्याह प्रदीपवदिति सर्वार्थप्रकाशनशक्तिमत्त्वप्रकाशनतात्स्वतो वेदान्तकल्पत्वं योनिरु
पादानं कर्ता च नन्वस्य वेदस्य योनित्वात् सर्वार्थज्ञानशक्तिमत्त्वं वेदस्य न त्वेन वेदस्याचिन्त्यानेः सर्वज्ञत्वं नेत्यत आह

पु॰सा॰ ९७ नन्तु कर्मविशेषमनारभ्य प्रकरणांतराधीतानां कथं तच्छेषत्वं मानाभावादित्यत आह उपासनेति मोक्षकामः स ब्रह्माभेदमारोप्याहं ब्रह्मास्मीत्युपा
सना विधिः आदिपदग्राह्यः तत्कार्यपरत्वेनावक्तव्यमित्यर्थः नन्वभ्यस्तविधित्वादप्रमाणत कार्यपरत्वं विमर्शमस्त्वमिति तत्राह नहीति यदि नः समन्ता
त्रिकाये न स्थितं परिनिष्ठितं वस्तु न पदं सिद्धमिति यावत् तस्य प्रतिपादनं मज्ञातस्य वेदेन ज्ञापनं तन्न संभवति मानांतरयोग्यत्वेन वाक्यस्य संवाद
त्वस्यानुवादकत्वात् अग्निर्हिमस्य भेषजमिति वाक्यवत् विसंवादित्वाद्बाधकत्वात् इत्यादित्यः प्लवा इति वाक्यवदित्यर्थः सिद्धो न वेदार्थः मानांतरयोग्य
त्वात् घटवदिति सुखा निष्फलत्वाच्च तदेवं स्यादित्याह नहीति सिद्धज्ञापनेन हेयोपादेयत्यागोपादेयफलाभावाच्च तन्न संभवतीत्यर्थः फलं हि सुखावाप्तिः
दुःखहानं च तच्च हेति निहेतिभ्यां साध्यं ते चोपादेयस्य प्रहेति प्रयत्नकार्ये स्यहेयस्य निहेति प्रयत्नकार्ये स्यज्ञानाभ्यां जाये न सिद्धज्ञा
॥ नादिति भावः तर्हि सिद्धवोधिवेदवादानां साफल्यं कथमित्याशंक्याम्नायस्येत्यादि संगृह्य वाक्यं विवृणोति अत एवेति देवैर्निरस्तः सेति ॥
मुपासनादि क्रियां तद्विधानार्थत्वं वा न रूपादि निहितवस्तु प्रतिपादने संभवति अत्यन्तादिविषयत्वान्यदनिहितवस्तुनः तस्यैतिपादेन
वहेयोपादेयरहितपुरुषार्थाभावादत एव सोरोदीदित्यादीनामानर्थक्यं मा भूदिति विधिनालैकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्तुतिरिति
स्तावकत्वेनार्थवत्त्वमुक्तम् मंत्राणां चेषे त्वेत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम् न क्वचिदपि वेदवाक्या
नां विधिसंस्पर्शमंतरेणार्थवत्ता दृष्टोपपन्ना वा न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति क्रियाविषयत्वाद्विधेः तस्मात्कर्मापेक्षित
कर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदांतानाम् अथ प्रकरणांतरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपास
28 नो॰दीति विवक्षयास्य जत्वेन सजातस्येति दामारावहिविनेदपमितिसफलनिषेधशेषत्वं वेदांतानां विध्यादिशेषत्वं वाच्यमित्यर्थः ननु तेषां
मंत्रवत्स्वार्थप्रमस्तुतार्थवादवद्विध्येकवाक्यत्वमित्याशंक्य दृष्टांतासिद्धिमाह मंत्राणां चेति प्रमाणलक्षणेऽर्थवादचिंतानंतरं मंत्रेषु चिंता कृता इषे पूर्वमीमांसा
त्वादृतिमंत्रे छिनद्मीत्यध्याहारेण च्छेदनक्रियाप्रतीतेरनुमंत्रेत्यादौ च क्रियासाधनदेवतादिप्रतीतेर्मंत्राः कर्तव्यादिभिः कृतैः किंतु वाध
कालिकमुच्चारणमात्रेणादृष्टं कुर्वते कृतावुपकुर्वंत्युत दृष्टेनैवार्थस्मरणेनेति संदेहे चिंतादिनाप्यध्ययनकालावगतमंत्रार्थस्मरणस्य संभवे
दृष्टार्था मंत्रा इति प्राप्ते सिद्धांतः अविशिष्टस्तु वाक्यार्थ इति लौकिकवैदिकयोर्वाक्यार्थस्याविशेषात् लौकिकवाक्यानां दृष्टेनैव स्वार्थप्रकाशनेनैकरूपका
रकत्वसंभवात् दृष्टसंभवत्यदृष्टकल्पनानुपपत्तेः फलवदनुष्ठानापेक्षितेन क्रियातत्साधनस्मरणेन मंत्राणां कर्मांगत्वं मंत्रैरेवार्थः स्मर्तव्य ११
इति नियमस्त्वदृष्टार्थ इति तथा चार्थवादानां स्तुतिपदार्थद्वारा पदैकवाक्यत्वं विधिभिर्मंत्राणां तु वाक्यीभावद्वारेणाभिधानैकवाक्यत्वमिति भावः
ननु तु कर्मप्रकरणस्थवाक्यानां विध्येकवाक्यत्वे वेदांतानां तु सिद्धप्रामाण्यं किं न स्यादित्यत आह न क्वचिदिति वेदांता विध्येकवाक्यत्वेनैवार्थवंतः सिद्धार्थत्वे

किं तच्छास्त्रमित्यत आह शास्त्रमिति ऋग्वेदादिरूपमित्यर्थः किमर्थमिति येन हेतुना दर्शितं ततः किमर्थमित्यर्थः जन्मादिलिङ्गका
नुमानस्य ख्यातेः अन्येऽपि व्यासशंकानिरासार्थं सूत्रत्रयं वक्तव्यमित्याह उच्यत इति वेदान्ताः सिद्धब्रह्मपरा उत कार्यपरा इति निष्फलत्वसाध
त्वयोः प्रसंगात्संशये पूर्वसूत्रद्वितीयवर्णके नान्तप्रमाणान्तरसिद्धत्वमाह कथं पुनरित्यादिना सदेव सोम्येत्यादीनां सर्वात्मत्वा
१८॥ दिरूपेण ब्रह्मणि तात्पर्येण समन्वयोऽर्थः फलवादिना नयः सर्वेषु वेदान्तेषु समन्वयात्प्रमाणत्वसिद्धेः सिद्धं ततो निष्ठितमिति विवेकः क
थमित्यादेरुपेतन्तः पावतीति यतो निमित्तं सूत्रेण व्याख्यानं स्वरूपे दर्शयति क्रियापरत्वं दर्शितमतो क्रियार्थत्वाद्वेदान्तानामानर्थक्यं फलवद
र्थस्मृत्यत्वं प्रमाणमित्यन्वयः सूत्रस्यायमर्थः प्रथमसूत्रे नाम्नादेश्यपापानुकरणाक्यं भावनाविधिभावेन फलवदर्थपरत्वमुक्तं
दनालत्वागोर्थो धर्म इति द्वितीयसूत्रे धर्मकार्यं चोदनाप्रमाणमिति वेदप्रामाण्यं व्यापकं कार्यपरत्वमवसितं तत्र वायुर्वै क्षेपि
ष्ठेत्याद्यर्थवादानां धर्मप्रामाण्यमस्ति न वेति संशये आम्नायस्य प्रामाण्यस्य क्रियार्थत्वेन तदानर्थक्यं वादेषु धर्मस्याप्रतीतेः कि

शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इमानि भूतानि जायन्ते इत्यादि किमर्थं तर्हीदं सूत्रं यावता पूर्वसूत्रेणैवैवंजातीयकं
शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितमुच्यते तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादिसूत्रे
केवलमनुमानमुपन्यस्तमित्याशंक्येत तामाशंकां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादिति कथं पु
नर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते यावता आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्र
स्य प्रदर्शितमतो वेदान्तानामानर्थक्यमक्रियार्थत्वात् कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं

यार्थत्वं तेषामानर्थक्यं निष्फलार्थत्वं न चाध्ययनविध्युपात्तानां निष्फलत्वे सिद्धे प्रामाण्यं युक्तं तस्मादनिरस्तमेषां प्रामाण्यमुच्यते
व्यापकाभावाद्व्याप्याप्रामाण्यनाशे वेति यावत् एवं पूर्वपक्षे विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति सूत्रेण सिद्धं तस्मा
त्क्रियापरत्वमिति अनित्यमिति प्रदर्शितमित्यर्थः वायुर्वै क्षेपिष्ठा देवतेत्यत्र देवतादेवताकं कर्मेति प्रमेयफलं दृश्यतीति
र्विधेयार्थानां स्तुतिरूपार्थद्वारेण वाक्यैकत्वमालक्ष्यते इत्यादिविधिनैकवाक्यत्वात् अर्थवादाः सफलाः स्युः स्तुति
लक्षणयास्फलकार्यपरत्वात् प्रामाण्यमर्थवादानां इति यावत् नन्वध्ययनविधिगृहीतानां वेदान्तानामानर्थक्यमयुक्तमित्यत आ
ध२ ह कर्त्रिति न वयं वेदान्तानामानर्थक्यं ब्रूमः किन्तु लोकसिद्धसमानार्थत्वेन निष्फलत्वाच्च सिद्धब्रह्मपरत्वेनैषां प्रामा
ण्यं तरश्रयेदिति निष्फलत्वयोः प्रसंगात् प्रामाण्याय तावत्कार्यशेषकर्तृदेवताफलानां प्रकाशनद्वारा कार्यपरत्वं वक्तव्यमि
ति ब्रूमः तत्रेदं तत्त्वदर्शिवाक्यानां कर्तृदेवताप्रकाशकत्वं विविदिषादिवाक्यानां फलप्रकाशकत्वं ॥

ए. भा. २१

ननु धर्मब्रह्मजिज्ञासयोः सत्र कारणमिदं कांडद्वयार्थभेद उक्तः एककार्यार्थत्वे शास्त्रभेदानुपपत्तेः तत्र कांडद्वये जि
ज्ञास्यभेदस्तावत्फलभेदेन लक्षणभेदेन वाच्यः तथा च मुक्तिफलायुक्ता न कर्मविधेयता मुक्तेर्विधेयक्रियाजन्यत्वेन कर्मफलाद्
विशेषप्रसंगात् अविशेषे जिज्ञास्यभेदासिद्धेः अतः कार्यफलविलक्षणत्वात् नित्यसिद्धमुक्तेः न ब्रह्मज्ञानं विधि
प्रयुक्तं इति शंकते नविधेरिति मुक्तेः कर्मफलाद्वैलक्षण्यमसिद्धमिति तदर्थं ज्ञाने विधेयं न च तर्हि सफलं कार्यमेव वे
दांतेष्वपि जिज्ञास्यमिति तत इदानीं सिद्धिरिति वाच्यं इष्टत्वात् नन्वत्र गुणेन जिज्ञास्यत्वमत्र विशेषः ज्ञानविधिशेषत्वेनास्त
त्र कृताब्रह्मप्रतिपादनादिति परिहरति नेति ब्रह्मणो विधिप्रयुक्तत्वं स्फुटयति आत्मा वा इति ब्रह्मवेदनं ब्रह्मभाव
कामो ब्रह्मवेदनं कुर्यादिति विधिपरिणामतः श्रुतिरदृष्टेः लोके ज्ञानस्वरूपं वेदांतानां वाचनोदयोपयति नियम इति ननु

नन्विह जिज्ञास्यवैलक्षण्यमुक्तं कर्मकांडे भव्यो धर्मो जिज्ञास्यः इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति तत्र धर्मज्ञा
नफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति नार्हत्येवं भवितुं कार्यविधिप्रयुक्तस्यैव ब्रह्मणः
प्रतिपाद्यमानत्वात् आत्मा वाऽरे द्रष्टव्यः य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः आत्मेत्येवोपासीत
आत्मानमेव लोकमुपासीत ब्रह्म वेद ब्रह्मैव भवतीत्यादिषु विधानेषु सत्सु कोऽसावात्मा ब्रह्मेत्याकांक्षायां तत्स्व
रूपसमर्पणेन सर्वे वेदांता उपयुक्ताः नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमान
न्दं ब्रह्मेत्येवमादयः तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति कर्तव्यविध्यननुप्रवेशे तु वस्तुमात्र
कथने हानोपादानासंभवात् सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्
ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मव
स्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात् स्यादेतदेवं यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रा
न्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत न तु निवर्तते श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारधर्मदर्शना
श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात् तस्मात्प्रतिपत्तिविधिवि
षयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति ॥

19

किं विधिफलमित्यत आह तदुपासनाच्चेति प्रत्यग्ब्रह्मोपासनात् ब्रह्मविदाप्नोति परमिति शास्त्रदृष्टो मोक्षः स्वर्गवल्लो
काप्रसिद्धफलमित्यर्थः ब्रह्मणः कर्तव्योपासनाविषयत्वे विधिशेषत्वानङ्गीकारे बाधकमाह कर्तव्येति विधिसंबद्धसिद्ध
बोधे प्रवृत्त्यादिफलाभावाद्वेदान्तानां वैफल्यं स्यादित्यर्थः नन्विति शंकाभाष्यं सर्पादिदृष्टान्तवैषम्येण परिहरति स्यादिति एतदेव
वर्तयेदस्मादित्यर्थः एवं ग्राह्यार्थमाह यदीति किं च यदि ज्ञानादेव मुक्तिस्तदा श्रवणाज्ज्ञानानन्तरं मननादिविधिर्न स्या
त् तद्विधेयकार्यमध्यासमुक्तिरित्याह श्रोतव्य इति महाना कार्यान्वितशाब्दः प्रथमादिफलस्यैव शास्त्रत्वासिद्धेः फलाभावान्न म
ननादिविधेयकार्यपरा वेदांताः इति पूर्वपक्षमुपसंहरति तस्मादिति २१

विधिपराद्वाक्यान्नभेदप्रसक्तिमाह यथेति सप्तदशप्रदेशप्राप्ति चोदनीयत्वेनोक्तं इत्यनेन विधिविधेयकेषु पादस्य स्याकां
क्षायाः सप्तदशत्वप्राप्तिकरोति तत्प्राप्तिसंस्कृतं तदा स्थूणः प्रयोगेनादृष्टेनोपात्तसंस्कृतो ग्रिहावेदनीयः वज्रहस्तः पु न्या॰ २
रंदर इति विधिपदैरेव वाक्यैः समर्थितेन तत्तुसन्तर्थः विधिपरवाक्यसांख्यादापि नैवाकाभेदः स्यादिति शंकानिरासाय संप्रपि
शाह माक्लान्तरार्थता तथा विशेषतयोचानेन प्रधानत्वेनेति नवाक्यभेदः प्रधानार्थभेदस्यैव वाक्यभेदत्वादिति भावः
तत्रेत्यत्र पूर्वपक्षिणोक्तमर्थविषयस्य ग्रहणा कुतो विधिशेषत्वमिति शंकते कुत इति हेतुव्यवहारेणाह श्रास्त्रतात्पर्य
निश्चयः हेतुव्यवहारे चत्रातः प्रवृत्तिनिवृत्तिरूपप्रयोजनं प्रयोगात्र दृश्यते अतः शास्त्रस्य प्रापितएव प्रयोजनेनैव कार्यत्वात
तु नेयमिति कार्यपरत्वं शास्त्रस्य ततः कार्यशेषत्वं ग्रहणमाह प्रवृत्तीति शास्त्रस्य नियोगपरत्वे हेत्वंतरमपि माह तथा
हीत्यादिना क्रियाकार्यनियोगो विधिर्वा सर्वविधितिर्न्यायेन वेदार्थत्वाका तात्पर्यमाख्यात्मकम् हेतुविति तस्य वेद
यथा भूपास्वनीयादी स्यात् किंकान्तविधिशेषतया शास्त्रे प्रामाण्यंते तद्व्युत्पन्नत्वादिति हेतिप्रयोजनत्वा
कार्यस्य तथा हि शास्त्रतात्पर्यविदः आहेति तत्पर्यार्थः कर्मावबोधने नाम चोदनेति क्रियायाः प्रवर्तकं वच
नेतस्य शास्त्रस्य उपदेशः तदुक्तं नाक्रियार्थेन समाम्नायः शास्त्रस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति विधा
नः प्रवृत्तकश्चिद्विषयविशेषप्रवर्तयत्नु ततश्च दृष्टार्थविशेषाणिवतेषु चार्थवत्त्वात् इत्नप्रयतयाचान्यदुपयुक्ते
तस्मात्सामान्यादेवतानामपितथैवार्थवत्तस्मात् सतिवविधिपरत्वेषणास्वार्थत्वादिकामस्यामिरेद्वादिसाधनेविधौ
यत एव समस्तत्वका मस्य ग्रस्तत्वं विधौ यत
सकार्यं वेदार्थं इत्यत्र चोदनासूत्रस्थं भाष्यमाह चोदनेति क्रियायामिति तस्य त्वानमिति तस्य
योगस्य त्वानद्वारा प्रवर्तकं वाक्यं चोदनेत्युच्यत इत्यर्थः शाबरस्वामिसंमतिमुक्तानैमिनीमतिमाह तस्य त्वानमिति तस्य
परमस्य त्वापकं प्रयोक्तृत्वं यदि विधिवाक्यमुपदेशः तस्य धर्मस्य व्यतिरेकादित्यर्थः पदानां कार्यान्वितार्थशक्तिरित्यत्र सत्रेप
पदार्थनां ५ इति तदुक्तानामिति तत्र वेदेषु नानासिद्धार्थनिष्ठानां क्रियार्थनकार्यवाचिनां लिङादिपदेन समाम्नायः सदेवाह
णांकतेव्यपदार्थं तत्र स्वाकार्यरूपकार्ययोनिमितत्वादित्यर्थः कार्यान्वितार्थस्वकानिपदानि कार्यवाचिपदेन सह
पदार्थस्मृतिद्वारा कार्यमेव वाक्यार्थं बोधयन्तीति भावः फलितमाह अत इति यतो हेतोरेवमतः सतो विधिनेषएव वाक्य
मेव यथास्वमर्थवादादिकं तत्तद्वेषतया एतेषामितिकं सर्वथा हेत्वा सामान्यधास्त्वं तस्मादेवतानां कार्यपरत्वेनैवार्थव
त्वस्यादित्यर्थः ननु वेदानेषु नियोगस्यैव विषयस्य चाद्यानां कथं कार्यपरत्वमित्यत्राह सर्वचेति ॥

ब्र॰ भा॰ २२

मनुष्यत्वादूर्ध्वं गते ब्रह्मादिस्थावरान्तेषु तारतम्यमुक्त्वाधोगतेष्वपि तदाह नरेति इदानीं दुःखतारतम्यं तदनुष्ठायिनां तारतम्यं वदन् धर्मफ
लं प्रपंचयति तच्चार्थमिति विविधकर्मफलं मोक्षस्य तद्वैलक्षण्याज्ञानानां धर्मापेक्षत्वमुपसंहरति एवमिति अस्मिन्नाका
मकोऽयमयास्या दिशमाह्यर्थः तेन भुक्त्वा स्वर्गलोकं विशालमित्याद्याः स्मृतिः काण्डेऽध्वनयान्त्वालोचयन् ऋतज्ञानात् फल
तारतम्यं तत्साधनतारतम्यं वर्तमानेन न्यायः श्रुतिमाह तथाहीति मोक्षो न कर्मफलं कर्मफलविरुद्धत्वेनेत्युक्तं विशे
कत्वं शरीरादियोगपद्यादि धर्मजत्वादिति व्यतिरेकमात्रं गारितवादिति न्यायान्तरमाश्रित्याह अशरीरत्वमिति वाक्यतयारणा
तत्वेति विदेहस्य तत्मात्मानं वैषयिके सुखदुःखे नैव स्पृशतीत्यर्थः मोक्षस्य धर्मजत्वे उपासनारूपधर्मफलं तद्वत् प्रियं स्पृशेदिति
त्रिविधयोगात् इत्याह धर्मकार्यत्वे हीति ननु प्रियं नाम वैषयिकं सुखं तेन त्रिविध्यते मोक्षस्तु धर्मफलमेव कर्मणामविरो

तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानस्तथोर्ध्व
गतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोः प्रतिषेधचोदनालक्षणस्याधर्मस्य तदनुष्ठायिनां
च तारतम्यं गम्यते एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तः शरीरोपादानपूर्वकः सुखदुःखतारतम्य
मनित्यः संसाररूपः श्रुतिस्मृतिन्यायप्रसिद्धः तथा च श्रुतिः न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति
२५ यथावर्णितं संसाररूपमनुवदति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्ष
णधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपप
20 द्यते॥ अशरीरत्वमेव धर्मकार्यमिति चेन्न तस्य स्वाभाविकत्वात् अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मानं
मत्वा धीरो न शोचति अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययं पुरुष इत्यादिश्रुतिभ्यः अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यम
स्था.२१ तिर शरीरत्वं नित्यमिति सिद्धं तत्र किंचित्परिणामिनित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते यथा पृथिव्या

त्रफलदानसामर्थ्यादिनिषेधकत्वे अशरीरत्वमेवेति आत्मनो देहासंयोगित्वमशरीरत्वं तस्यानादित्वान्न कर्मसाध्यतेत्याह
नेति अशरीरस्य स्थूलदेहशून्यस्य देहेष्वनेकेष्वनित्येषु एकं नित्यं समवस्थितं महान्तं मत्वापि न आपेक्षिकमहत्त्वं वारयति वि २२
भुमिति तमात्मानं ज्ञात्वा धीरः स्वच्छोऽकोपलक्षितं संसारं नानुभवतीत्यर्थः सूक्ष्मदेहाभावे श्रुतिमाह अप्राण इति
प्राणमनसोः क्रियाज्ञानशक्त्योर्निषेधात्तदधीनानां कर्मज्ञानेन्द्रियाणां निषेधो ऽयितः शुभ्रः शुद्ध इत्यर्थः देहद्वयाभा
वे श्रुतिः असङ्गो हीति निर्देहात्मस्वरूपमोक्षस्यानादिभावत्वे सिद्धे फलितमाह अत एवेति नित्यत्वेऽपि परिणामितया
धर्मकार्यत्वं मोक्षस्य स्यादित्याशङ्क्य नित्यं द्वेधा विभजते तत्र किंचिदिति नित्यत्वस्य मध्ये इत्यर्थः परिणामि च तन्नित्यं चेति परिणामि

वेदांतानविधिपराः स्वार्थफलत्वेनसमितियोज्यविधुरत्वात्राप्येसमर्थ्यतिवाक्यवत् सोमेदीक्षितस्वर्गकामोयजेतेतिवाक्ययोर्नित्यमार्थ्यदे
तोविशेषणद्वयमितिसिद्धांतयति श्रुतेति यदुक्तंमोक्षकामस्यनियोज्यत्वात्तत्रविधेयमितितत्रेमाह नेति मोक्षोनविधिजन्यःक
र्मफलविलक्षणत्वात् आत्मवदित्यर्थः उक्तंहितुलनायकर्मफलत्वेप्रपंचयति शारीरमित्यादिनावर्णितसंसारस्वरूपमनुवदतीत्य
नेन अथवेदाध्ययनानंतरं ध्याकेवेदेसफलत्वदर्शनवत्वात् धर्मजिज्ञासायांकर्मवाक्यविचारः कर्तव्यइतिसूत्रार्थः नकेवलंधर्मोक्षं
कर्मकिंत्वधर्मोपीत्याह अधर्मोपीति निषेधवाक्यप्रमाणकत्वादित्यर्थः कर्मणःफलमाह तयोरिति मोक्षस्वतंत्रीद्वयोर्विशेषकः
शारीरादयोमोक्षविषयादिजन्योनात्मनिस्त्वप्रसिद्धइतिवैलक्षण्यज्ञानाय प्रत्यक्षत्वादीनि विशेषणानिसामान्येनकर्मफलमुक्त्वा
धर्मफलेषुप्रपंचयति मनुष्यत्वादिति सत्वेक्षमानन्देआनंदस्तत्रः शानतारतम्यंपर्वादीनामितिक्रमेणमवानुमारत्वमवग

अत्राभिधीयते न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं यद्विषया जिज्ञा
सा अथातो धर्मजिज्ञासेति सूत्रिता अधर्मोपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय तयोश्चोदनालक्षण
योरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्था
त वरांतेषु प्रसिद्धे मनुष्यत्वादारभ्य ब्रह्मांतेषु देहवत्सु सुखतारतम्यमनुश्रूयते ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते धर्मतारतम्याद २
धिकारितारतम्यं प्रसिद्धं चार्थित्वसामर्थ्यविद्वत्तादिकृतमधिकारितारतम्यं तथा यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण
पथा गमनं केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनं तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्राद्याव
त्संपातमुषित्वेत्यस्माद्गम्यते॥

त्यर्थः तत्र सुखतारतम्यादित्यर्थः मोक्षस्तु निरतिशयस्तत्साधने च तत्तत्तारतम्ये कर्मरूप
मितिवैलक्षण्यं किं च साधनं च तत्त्वज्ञानमेकरूपमेव मोक्षविद्याधिकारी कर्मणि तु नानाविध इति वैलक्षण्यमाह धर्मेति
गम्यते न केवलं किं तु प्रसिद्धं चेत्यर्थः अर्थित्वं फलकामित्वं सामर्थ्यं लौकिकं प्रज्ञादि आदिपदाद्दुष्टत्वशास्त्रानिषिद्धत्वं च
किं च कर्मफलमार्गे प्राप्यं मोक्षस्तु निरुपाधिरिति भेदमाह तथेति उपासनायां चित्तस्थैर्यं एकाग्रता अर्चिरादिमार्गगामानुप्रलो १
कगमनं तेनैव मार्गेणेत्यादिना सूच्यते इत्यर्थः अग्निहोत्रं तपः सत्यं वेदानां चानुपालनं आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते
वापीकूपतडागादि देवतायतनानि च अन्नप्रदानमारामः पूर्तमित्यभिधीयते २ शरणागतसंत्राणं भूतानां चाप्यहिंसनं
बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते ३ तत्रापि चंद्रलोकेपीत्यर्थः संपतति गच्छत्यस्माल्लोकादमुं लोकं येनेति संपातः कर्म
यावत्कर्मभोगं तावदुषित्वा पुनरायातीत्यर्थः॥

मं. १३
२२

प्रदीपानमेनिवृत्तिवत्तानादत्तान निवृत्तिरूपमोक्षस्य हेतुफलत्वाद्युक्तनियोगमाध्यवसित्याह अपि चेति योऽयमाद्यमि
निवेदमत्रमेवमवतिपरकारणं सर्वकार्यं तद्रूपतद्धिष्ठानेत मिन्द्रहेसत्यस्यहेतुरनारब्धफलानि कर्माणि नश्यन्ति त
स्माः स्वरूपानंदविज्ञानोर्मर्यो भवति द्वितीयाभावात् अभयं तस्य भयान्तानेकानात् तन्नीवाविभ्रमस्य स्वदेशाद
त्मानमेवाह ब्रह्मास्मीत्येवं विदितवतनस्माहेदनात्तु ब्रह्मपूर्णं समभवत् परिछेदभ्रान्तिस्नादेकत्वमहं ब्रह्मेत्यनुभवतः
तत्रानुभवकालेऽस्माद्दृश्येन कोऽनललरीतिश्च तीनामर्थः नासौनानमर्थमाह यदेति विद्यानफलयोः सम्यग्रूपार्थः मोक्षस्य
विधिफलत्वे स्वर्गादिवत्कालान्तरप्राप्तिः स्यात् तथा चक्षुतिव्याधातिभावः इत्यत्र मोक्षेऽवैयानेकमाह नचेति तदस्येत
त्मत्वसीतिपूर्ववत्तस्मात्सत्तामदेवामतीह अयं ब्रह्मप्रतिपदेहत्वज्ञाननिष्ठानमुवानामेत्रान्तस्य सर्वात्मकत्व
प्रकाशकान्तदन्तरिमादीनां ज्ञानदर्शिनोऽर्थः यद्यपि त्रिविनिर्णियतक्रियायालत्वान्ब्रह्मदर्शनं तत्त्वप्रमितिः कि
अपि ब्रह्मवेदब्रह्मैव भवतीतीयते चास्य कर्माणि नश्यन्ति परावरे आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन अभ
यं वै जनक प्राप्तोऽसि तदात्मानमेवावेद अहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तत्र को मोहः कः शोक एकत्वमनुप
श्यतः इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति तथा तं हैतमपश्यदृषिर्वाम
देवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणाय उदाहार्या यथा तिष्ठन्
गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते तथेदं त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारय
सि श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं पारं
तारयत्विति तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्ध
निवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति तथाचाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपं यथा अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयतीति न चाध्यासरूपं यथा मनो ब्रह्मेत्युपासीतादित्यो ब्रह्मेत्यादेश इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः नापि विशिष्टक्रियायोगनिमित्तं वायुर्वाव संवर्गः प्राणो वाव संवर्ग इतिवत् नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्कारः संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् ब्रह्म वेद ब्रह्मैव भवतीति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्

ऽऽत्मानं कूटस्थनित्यं इति न कर्मसाध्यमित्याह इदं त्विति परिणामिनो नित्यत्वं प्रत्यभिज्ञाकल्पितं मिथ्यैव कूटस्थस्य सततासिद्धा-
भावात् नित्यत्वं पारमार्थिकं कूटस्थस्यापि परिच्छेदाभावमाह व्योमवदिति परिणामाभावमाह सर्वविक्रियारहितमिति फला-
नपेक्षित्वात् फलार्थमपि विक्रियेत्याह नित्यतृप्तमिति तृप्तिरनपेक्षत्वं विशेषकं स्वेत्वा निरवयवत्वान्न क्रियालम्भनार्थमपि
न क्रिया स्वयंज्योतिःस्वभावं अतः कूटस्थत्वान्न कर्मसाध्यो मोक्ष इत्युक्तं कर्म न तत्कार्यसंगित्वाच्चेत्याह यत्रेति कालेन च
च्छिन्नत्वाच्चेत्याह कालेति कालत्रयं च नोपावर्तेते तत्र नियोगप्रयुक्तयासं वेधनीयं धर्माद्यन्वयमेवेत्याह अन्यत्रेति अन्य-
दित्यर्थः कृताकृतात् कृतात्कार्यात् अकृतात्कारणात् भूताद्भव्याच्च चकाराद्वर्तमानाच्चान्यदन्यत्र पश्यसि तद्वदेत्यर्थः ननु श्रुतयो ब्रह्मणः
कूटस्थत्वेऽपि नित्यत्वं वदन्तु मोक्षस्य नियोगफलत्वं किं न स्यादित्यत आह अत इति तत्कैवल्यं तस्यैव कर्मफलविलक्षणत्वादित्यर्थः

इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावं यत्र
धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते तदशरीरं मोक्षाख्यम् अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्
अन्यत्र भूताच्च भव्याच्चेत्यादिश्रुतिभ्यः अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता तद्यदि कर्तव्यशेषत्वेनोपदिश्येत तेन च
कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत अनित्य एव स्यात् तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु क-
श्चिदतिशयो मोक्ष इति प्रसज्येत नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते अतो न कर्तव्यशेषत्वेन ब्रह्मोप-
देशो युक्तः ॥

ब्रह्मात्मैक्यत्वमस्य कूटस्थत्वे धर्माद्यसंगित्वं चेति भावः यद्यपि जिज्ञासितं तद्ब्रह्म अतः पृथक्त्वास्य
त्वात् मोक्षस्य इत्यर्थः अतः शाब्दभावनादेव व्यवस्थेत्यर्थः अत एव विधिस्पर्शेण स्वरूपतः न स्यात्कार्यं विलक्षण-
त्वेन विधानविषयत्वाभावात् न हि ब्रह्मात्मैक्यं भेदप्रमाणेन ज्ञायते विधिपरवाक्यान्तर्भावेन वा तद्विना विधेरनुपपत्तिः
योगिदृश्येनापि विविदर्शनादिति भावः अथवा प्रागुक्तस्य नियोगासाध्यत्वे फलितमर्थमाह अत इति यद्वेति
तास्य ब्रह्मत्वं वेदान्तैरुपदिश्यते समन्वयादित्यर्थः विधिवदेवं प्रतिपाद्यति तद्यदीति तत्रैवं सतीति मोक्षसा-
ध्यत्वेनानित्यत्वमित्यर्थः अत इति मते नियोगसाध्यत्वेन नियोज्याभावात् कर्तव्यनियोगाभावादित्यर्थः ॥ ॥

प्रतिज्ञा च तत्प्रयोजनमाह संपदादीति उपक्रमादिलिङ्गैर्ब्रह्मात्मैकत्वे वस्तुनि शास्त्रमिति हेतुः उपासनाधिकरणवाक्या
नां पदनिष्ठः समन्वयः तात्पर्यं निश्चितं तत्पदोक्ते न किंचैकत्वज्ञानादज्ञानस्य कस्यचिद्दृश्यते अतः करणस्य नोपासनादिरू
षि श्रितत्वमनन्तानन्दस्वरूपाहङ्कारग्रन्थिविनाशपरत्वमनन्तानन्दनिवृत्तिफलत्वाच्चार्थवादः स्यान्नेषु संपदादिज्ञानस्य प्रमा
णेनाज्ञाननिवर्तकत्वं किंच जीवस्य ब्रह्मत्वं संपदादिकं कथं तद्भावः पूर्वरूपस्थितेन हेतुनान्यस्यान्यात्मत्वाभावात्तस्मा
त्संपदादिरूपमित्यर्थः फलितमाह अत इति प्रमाणान्तरकृतिसाध्यासिद्धा किं तर्हि तन्निमित्तप्रमाणसाध्येत्यर्थः उक्तरीत्या

संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने तत्त्वमस्यहं ब्रह्मास्म्ययमात्मा ब्रह्मेत्येवमादीनां वाक्या
नां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशया इति चैवमा
दीनामविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् ब्रह्म वेद ब्रह्मैव भवतीति चैवमादीनि तद्भावापत्तिवचनानि संप
दादिरूपत्वे न समञ्जसानि स्युः तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् अतो न पुरुषव्यापारतन्त्रा ब्रह्मवि
द्या किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रैव एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या
शक्यः कार्यानुप्रवेशः कल्पयितुं न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः अन्यदेव तद्विदितादथो अ
विदितादधि इति विदिक्रियाकर्मत्वप्रतिषेधात् येनेदं सर्वं विजानाति तं केन विजानीयादिति च तथोपास्तिक्रिया
कर्मत्वप्रतिषेधोऽपि भवति यद्वाचानभ्युदितं येन वागभ्युद्यते इत्यविषयत्वं ब्रह्मण उपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं य शा०१
दिदमुपासत इति

सिद्धब्रह्मरूपमोक्षस्य कार्यसाध्यत्वं ज्ञानस्य नियोगविषयत्वं च कल्पयितुमशक्यं कृत्यसाध्यत्वादित्याह एवं
भूतस्येति ननु ब्रह्म कार्यांगं कारकत्वात् कारकवदिति चेन्न ज्ञानेन ब्रह्मणः कर्मकारकत्वस्य
लोपासनयोः नाप इत्याह न चेति ज्ञानोपासने विदिक्रियासाध्यार्थः विदितं कार्यं विदितं कारणं तस्मादन्य
दित्यर्थः येनात्मना इदं सर्वं दृश्यं लोको जानाति तं केन करणेन जानीयात् तस्मादविषयत्वमित्यर्थः न द्वितीयप्रत्य
क् न चेति यन्मनसा न मनुत इति श्रुत्या लोकोपमलसाध्यत्वं ज्ञानातीतत्वविषयत्वमुक्त्वा तदेव वेद्यं च ब्रह्म त्वं वि २५
द्धि यत्तु पाधिविशिष्टदेवतादिकमिदमित्युपासते जनाः नेदं ब्रह्मेत्यर्थः ॥

२२

एवं च भूतेऽत्र प्रमाणमुक्तिरेव नैकमित्युक्तं न वा तापादस्य निरस्तमित्याह तथा चेति गौरवेद कमिति मिथ्याज्ञानस्यापायेन रागद्वेषमो
हादिदोषाणां नाशः दोषापायाद्धर्माधर्मरूपप्रवृत्तेरपायः प्रवृत्त्यपायाज्जन्मनो देहाभिसंबन्धरूपजन्मापायः एवमपवर्गक्रमेणोत्तरोत्तरस्यापि
तन्नाशात्त्रयोऽप्यनित्यस्य प्रवृत्तिरूपदेहेन्द्रियनिरस्य कार्यस्य जन्मनो नाशाद्दुःखध्वंसरूपोऽपवर्गो भवतीत्यर्थः ननु पूर्वं सत्त्वेन तत्त्वज्ञा
नाद्विप्रतिपत्तिनिरासेन सतीनरपदार्थमिथ्याज्ञानतत्त्वज्ञानेकपमोक्षसाधनतीत्याकांक्षायां मिथ्याज्ञाननिवृत्तिद्वारेणापवर्ग
मिद्धेऽस्योपपत्तेः तथा च मिथ्याज्ञानतत्त्वज्ञानाभ्यां मुक्तिरेव दुःखसंसृष्टमते चेतनस्य ममतानुत्पत्त्या हि प्रवृत्त्यभावात् मिथ्येति तत्तज्ञानान्मुक्तिरिति
प्रासंगिकमतिरुक्तमोऽदृष्टानां न यत्र दृष्टेन निवृत्तिभवतीति अकर्माभोगेनित्यात् कर्मणः संस्कृतशोऽनिवृत्तत्वादेव प्रवृत्तीति कर्मानन्त्य
हेतुनाद्यनमुक्तिरेव निर्मिमावः ननु श्रवणाद्येकत्वविज्ञानमपि भेदज्ञानव्रजप्रमासंपदादिरूपत्वेन भाविनत्वादित्यत्र

तथा चार्थप्रयोजनेनापवर्गे हेतुनेस तेषु दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः
इति मिथ्याज्ञानाभावरूपस्य चापि तदर्थं तत्त्वज्ञानं मिथ्याज्ञानापायसूत्रस्यानेकत्वविज्ञानं भवति नन्वेकस्यानेकत्वविज्ञा
नस्य पदार्थयथाज्ञानेन वैसनोऽनेकाविशेषात्मज्ञानमेव सतेन लोके जयतीति तत्त्वज्ञानमनुष्यावामनोऽत्र स्यस्यपाशी
नभूताकाशेसंभवन्ति यद्यपिआत्मशब्दो जीवेसम्भवति तथापीतरेभ्यः कारणेभ्यो जीवोदहराकाश इति निवर्तिता

नंदु भवति ननु [illegible] परिच्छिन्नस्याकाशस्य पुण्डरीकवेष्टितेदहराकाशे निवर्तितेपि [illegible] अस्मात्भेदविवक्षया
तिः जीवस्यसर्वगतत्वादिविवक्षयेति [illegible] जीवस्यसर्वगतत्वादिविवक्षयेनेवमुपपादनं [illegible]
[illegible] विवक्षयाभिनि [illegible] जीवेन [illegible] जीवस्य [illegible]
[illegible] एकदेशवर्तित्वमस्तित्वं [illegible] परमेश्वरस्य [illegible]
[illegible] जीवस्य [illegible]
[illegible] सर्वोऽस्य पुण्डरीकस्य [illegible] जीवपुरस्य [illegible]

संबंधात् ननु ब्रह्मणः पुरमिति [illegible] निरूपयति [illegible] अत्र ब्रह्म
इति शरीरस्य ब्रह्मपुरत्वानुपपत्तिः [illegible] शरीरस्य [illegible] अन्वयः
ननु ब्रह्मपुरस्य जीवपुरत्वात् [illegible] कथं [illegible] अथ एवेति [illegible]
मितिब्रह्मजीवः [illegible] पुण्डरीकस्य [illegible] ब्रह्मपुरमेव [illegible] ॥

ब्र०
भा०
८२

यश्चात्मेति प्रकृतानुकर्षणार्थश्चशब्दः दहरस्य धृतिसामर्थ्यविशिष्टमर्थमाह दहरोऽस्मिन्नित्यादिना अस्मिन्नेव धृतिशब्दः कर्तृसाधनत्वात्तं
तः सेतुर्महिमाशब्दसामानाधिकरण्येन धृतिशब्दः किंतु तेन विधारणाख्या क्रिया कीर्तितेति भावे क्तिनो विधानादिति विभागः
सेतुरसंकरहेतुः विधृतिलक्षणोऽपि निर्दिष्टः किमयो नकृतमाह यथा दकेति सेतुर्योजयति एवमिति धृतेश्च दहरः प
रमेश्वरः धृतिरूपस्य नियमनस्य च महिम्नोऽस्मिन्परमात्मन्येवोपलब्धेरिति सूत्रार्थः धृतेश्चेति चकारात्सर्वपदोक्तनिया
मकत्वलिङ्गग्राह्यं तत्र नियमनेश्वरत्वरोपलक्षितमाह एतस्येति धृतेनामाह नयेति आम्नातमन्त्रकाण्डेनैदोष्यत इति स्वयं मो
दहरोऽस्मिन्नन्तराकाश इति हि प्रकृत्याकाशोपमापूर्वकं तस्मिन्सर्वं समाधानमनुक्रान्तस्मिन्नेवचात्मशब्दं प्रयुज्यापहतपा
प्मत्वादिगुणयोगं चोपदिश्य तमेवानन्तिकृतप्रकरणं निर्दिश्य एष आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय
ति तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्यात्तिधारयितेत्युच्यते किंच कर्तरिस्मरणात् यथोदकसंतानस्य वि
धारयिता लोके सेतुः सेतुः क्षेत्रसंपदामसंभेदाय एवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां
च विधारयिता सेतुरसंभेदायासंकरायेति एवमिह प्रकृते दहरे विधरणलक्षणं महिमानं दर्शयति अयं च महि
मा परमेश्वर एवोपलभ्यते एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादेः तथा
अत्रापि निश्चितेपरमेश्वरवाक्ये श्रूयते एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकाना
मसंभेदायेत्येवं धृतेश्च हेतोः परमेश्वर एवायं दहरः प्रसिद्धेश्च १७ इतश्च परमेश्वर एव दहरोऽस्मिन्नन्तराकाश उच्य
ते यत्कारणमाकाशशब्दः आकाशो वै [yellow] नाम रूपयोर्निर्वहिता सर्वाणि ह वा इमानि भूतान्याकाशादेव स
मुत्पद्यन्त इत्यादिप्रयोगदर्शनात् जीवेन न कश्चिदाकाशशब्दः प्रयुज्यमानो दृश्यते भूताकाशस्तु सत्यामप्याकाशश
ब्दप्रसिद्धावुपमानोपमेयभावाद्यसंभवान्न ग्रहीतव्यः इतरपरामर्शात्स इति चेन्नासंभवात् १८
षिप्रकरणाकाशशब्दस्याविभक्तत्वात्त्वत्तोऽवाप्रसिद्धिः यथा शत्रुर्यथादिषु आत्मापहतपाप्मेत्यादिवाक्यशेषबलेन दहरः प
रः तर्हि जीवोऽपीत्याशङ्कानिषेधति इतरेति जीवस्य वाक्यशेषमाह अथेति दहरोक्त्यनन्तरं सर्वलोकोपरमपिदृशे ऽसौ च्यते
य एष संप्रसादो जीवोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणा
भिनिष्पद्यत इत्येतदेव प्रत्यगात्मज्योतिरूपसंपद्यते य एषोऽमृतोऽभयमेतद्ब्रह्मेति वाक्यशेषः स्मर्यते स्वरूपेणेति वाक्यशेषः
स्वरूपेणाविर्भवतीत्याह ॥ यदि वाक्यशेषबलेन दहरः इति परमेश्वरः परिगृह्येत तर्हि जीवोऽपि वाक्यशेषे परामृश्यते अथ य एष संप्रसादोऽस्माच्छरीरात्

८२

दहराकाशस्य ब्रह्मत्वे हेत्वन्तरमाह गतीति प्रजा जीवा एतं दहरं ब्रह्मसत्त्वं ब्रह्मलोकमहरहः प्रत्यहं स्वापे गच्छन्त्येतदहरात्मस्थि
तापानृतेनावृता नाहं ब्रह्मास्मीति न जानन्ति अतः प्रत्यूढा इति हेतोः नन्वेतेन सुषुप्तावहरहर्ब्रह्मगमनमुक्तं जीवानां तत्र दहरत्वे किं मानमत
मित्याशंक्य तथाहीति लोकेऽपि दृष्टमित्यर्थान्तरमाह लोकेऽपीति गतिलिङ्गमालोच्य श्रुत्यन्तरं चाह ते
ऽपीति जीवब्रह्मणोः काशीसीमब्रह्मलोकशब्दस्य प्रसिद्धिरिति भावः ब्रह्मण्येव तस्य प्रसिद्धिं शंकते ननु इति निषादस्थपति न्याये
न समाधत्ते गमयतीति षष्ठी चिन्तितेऽस्यापीति विचारः शाब्दसामर्थ्यात् यो हि मित्रः विषयायपलयानि षादस्थपतिन्यायेनैव दिसा
गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च १५ दहरः परमेश्वर एवोत्तरेभ्यो हेतुभ्य इत्युक्तं तानेवोत्तरान्हेतून्प्रपञ्चयति इतश्च पर
मेश्वर एव दहरो यस्माद्दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ भवतः इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य
एतं ब्रह्मलोकं न विन्दन्तीति तत्र प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानाम
भिधीयमाना दहरस्य ब्रह्मतां गमयति तथाह्यहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यन्तरे स
ता सोम्य तदा संपन्नो भवतीत्येवमादौ लोकेऽपि किल गाढं सुषुप्तमाचक्षते ब्रह्मीभूतो ब्रह्मतां गत इति तथा ब्रह्मलो
कशब्दोऽपि प्रकृते दहरे प्रयुज्यमानो जीवभूताकाशाशंकां निवर्तयन्ब्रह्मतां गमयति ननु कमललासननलो
कमपि ब्रह्मलोकशब्दो गमयेत् गमयेद्यदि ब्रह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्येत समानाधिकरणवृत्त्या तु
व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोकः इति परमेव ब्रह्म गमयिष्यति एतदेव चाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलो
कशब्दस्य समानाधिकरणवृत्तिपरिग्रहे लिङ्गं नह्यहरहरिमाः प्रजाः कार्यब्रह्मलोकं सत्यलोकाख्यं गच्छन्तीति श
क्यं कल्पयितुं १५ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः १६ धृतेश्च हेतोः परमेश्वर एवायं दहरः कथं
म्यायेनेत्वत्र निषादस्थपतिः स्वामी दिवृत्तौ समासेन तत्रैव वर्णितं कोणग्रहः श्रुतिं विनादिसामर्थ्यात्र न निषादस्थापोऽस्थपति
रिति कर्मधारयेण निषादेऽन्यत्र गृहीतो मर्थ्यादि निषादमिति साहतः निषादस्थपतिः स्थानि विनादस्थानि षादेष्टाकृत्वा
तस्याः पलनपशब्दे संबन्धलक्षणकल्पनागौरवात् स्वतंत्रैरिति तीर्थपाल्विषमेकः पूर्वपदस्य च पुरुष एकस्य तत्पुरुषो लघुवान् अतोऽपि
लाटस्यैव षष्ठ्यामर्थ्यमात्रकल्पनमिति नित्य ब्रह्मलोकपदेऽप्येवमिति परिणामार्थः कर्मधारयलिङ्गं चाहर्तीति पाचष्टे एतदेव ति
स्तैव चकारार्थः समाधसमुच्चयार्थः सर्वज्ञत्वादप्याप्तिलिङ्गं च दहरः परमात्मेत्यर्थं गतीति ननु यस्तु दहरप्रकरणस्थ
विषयस्य तां धृतेदहरलिङ्गमिति निराकृते कथमिति ॥

भा
घा
६३

तद्यत्रेति सुषुप्तिपर्यायेण जीवमेव प्रजापतिर्ब्रह्माचष्टे प्रत्यक्षतः यत्र काले नष्टे तस्मिन् संप्रयायात् यथास्तमः सम्यगस्तो निरस्तः करणग्रामो यस्य स समस्तः अत एवोपरतकरणत्वात् स्वप्नकालच्छाहीनः सम्प्रसन्नः स्वप्नप्रपञ्चमज्ञानमात्रेणैव विलापयति सुप्तोऽज्ञानमपन्नात्मकाह्निल ह्यः प्राप्तप्रसन्नेन मेन कारणशरीरमाहीनस्य मात्स्यस्य सत्ता स्फूर्तिग्रहणात्सत्त्वमर्थः वत्सुषुप्तिपर्यायेण प्रकोकः तस्यैवापहतपाप्मत्वादिगुणत्वाशंका तस्यापि पर्यायेण जीवपरत्वमाह नाहेति आहेति निपातः खेदार्थे खिद्यमानो हरीहरवाचनं खल्वयमः सुषुप्तावस्थानमस्ति सुषुप्तावस्थायां स्वं देवदत्तोऽहमस्मीत्येवमात्मानं जानाति नोएव नैवेमानि भूतानि जानाति किन्तु विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति दोषमुपलभ्य पुनः प्रजापतिमुप

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति जीवमेवावस्थान्तरगतमाचष्टे स एवापहतपाप्मत्वादिदिव्यमेतदमृतमभयमेतद्ब्रह्मेति नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति च सुषुप्तावस्थायां दोषमुपलभ्य पुनरेव तेन भगवानुवाच स्वामिनो एवावत्रैतस्मादिति चायमकम्प्यशरीरेव संबन्धनिरासपूर्वकमेषसंप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्येतस्मात्तमः उदयशतिजीवमेव शरीरात्समुत्थितं समुत्तममुत्कृष्टं ज्योतिरितस्मात्किं ज्योतिरपरं जीवमेव सुराणां परमात्मतोद द्योऽस्मिन्नन्तराकाशाः इति जीवएवोक्तः इति वक्तव्यं ब्रूयात् तथा इति ब्रूयात् आविर्भूतस्वरूपस्त्विति तु यात्रु: एतस्माह र्षाणां नत्वस्माद्विवाकादिहजीवस्यापि कारसंभवतीत्यर्थः कस्मात् यतस्तत्राप्याविर्भूतस्वरूपो जीवो विवक्षिते आवि ४५
र्भूतस्वरूपमस्यात्माविर्भूतस्वरूपः भ्रातःपूर्वं गमाजीवचनं पुनरुक्तं भवति यदपेक्षितनित्यत्वितत्वेतरत इत्यारंभेति

समाद्येदोषं श्रुत्वा प्रजापतिराह एवमेवेति एतस्मान्नकृतोऽपहतो नान्यत्रात्मनः आख्यास्यामीत्युपक्रम्य मघवन्मर्त्यं वा इदं शरीरमिति निरस्तपूर्वकं जीवमेवदर्शयतीत्यर्थः तस्मात् प्रजापतिवाक्याद्देवोऽस्मि वासिद्धः सिद्धान्तयति नेत्यतीति एव स्यान्तरात्मोपनेता विभूतेऽधिगन्तुमर्थयमानो ब्रह्मत्वमिव कमित्यर्थः तर्हि सुषुप्तौ न जीवो किं कथं तर्हि तेन जी ६३
वत्त्वनिष्पन्नत्वादित्यत आह भूतपूर्वमिति ज्ञानाभावेऽपि विज्ञानत्वकार्यं पश्यति विवक्षितत्वेन हि जीवत्वमभेदिति कृत्वा नानन्तरं ब्रह्मणोऽपि जीवत्वात्मत्वाद्य इत्यर्थः विश्वतैजसप्राज्ञतुरीयपर्यायश्च तदयात्मक प्रजापतिवाक्यसतात्पर्यमाह एतदिति ॥

81

यदि वाकाश एव दलेन दहर इति परमेश्वरः परिगृह्यतां तस्मात् जीवस्य वाक्यशेषे परामर्शोऽथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसं
पद्य स्वेन रूपेणाभिनिष्पद्यत ४२ दोषे २ टी० किं न स्यादिति ज्ञाते नियामकमाह नैतदित्यादिना दहरश्रुत धर्माणामसंभवाज्जीवो न दहर

ज्योतिषा नात्मत्वेन निरूपाति एष इति संप्रसादेरत्वाच चितितिष्ठतेनसमवस्थावस्थानमपि जीवस्य लिंगमिति नम्र नवेति नरास्ति इत्यर्थः ४३ टी०
तस्य तस्मात्समभ्यानेह हांतः यवेति ननु छान्दोग्ये काशयाब्दो जीवे न हृदयस्यापंके वाक्ये वस्यान्यालिंगावला कस्यापत्याह य
यावेति नियामकाभावाज्जीवोदरः यः नाहिं इत्यनकृतिमनाजश्र व्यतिरेकेति उत्तराच्चेदाविर्भूतस्वरूपस्तु शंकानिरस्यार्थमिति यः कानहिजीव
परामर्शस्यगतिस्तत्राह परिहतमेति जीवस्याज्ञानस्य स्थानभवस्तत्रानातीपणरामर्शे इतिवयते असंभवादिमिहेतारशिहिमा
४ एषयाप्तेति हेवाचेति अत्र हिंसं प्रसारशाह यः अनेवं नैसमासमावस्थायां देहत्वादवस्थावेतं जीवं शंकोम्य पस्यापरितेना
धीनं तत्ता शरीरस्यायाभ्यु पश्चन्जीवस्य शरीरसत्त्वमनमसंभवति यथा काशावपाक्रुणाणां वास्यादीनामाकाशातन्त
स्यानेनहूत यथा वाहहोपिलोके परमेश्वरविषयश्चाकाशयाः परमेश्वरपरमसम्मु याहाराहकाशावे नामरूप
योनिर्विहितेत्पत्रमारोपप्रसमस्वरविषयस्य प्रपणानपर्वजीवविषयो विभवितान्ति तस्मात् इतरपरामर्शाद्दहरो सि
इत्यनराकाशारंभत्रस्य एव जीव उत्यानशंकितेतत्र नैततस्मात् ज्ञानमसंभवाज्जीवो वायुराशागुणात्रिपरिच्छेदाभिमानीस
आकाशोनावमीयते नैवासंप्रियार्थान भिमन्तमानस्या पहतपाप्मत्वादयोधर्माः संभवंति अर्थचितवेतन्त्रस्वयमस
हे शुल्यिनेकाशाकाणविहाराणवृत्तनकयमस्स परिहरविदितेचोपरिहादस्माच्छरीरात्समुत्थाय परामर्शो इति उत्तराच्चेदाविर्भूतस्व
रूपस्तु २ इतरपरामर्शात्ज्जीवायंकाकाना साशः संभवाविरकृता अपहतपाप्मत्वादयो नैसकाशमनः स
मुत्थानजीवाशंकापाः क्रियते उत्तरस्मात्प्रजापतिवाक्यात् नया तु पुरात्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकमात्मा
नमनत्वेष्टव्यं विजिज्ञासितव्य इत्युपक्रम्य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं नि
र्दिशति एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य य एष स्वप्ने महीयमानश्चरत्येष आत्मेति ५२
शंकापरिहरति उत्तराच्चेदित्यादिसूत्रं निराकरणार्थः जीवाशंकायाः प्रजापतिवाक्यबलात् पुनः समुत्थानं क्रियते तत्र जीवस्ये
वापहतपाप्मत्वादिश्रवणात्तासंभवासिद्धिरित्यर्थः कथं तत्र जीवो विविक्तत्वमत्र तत्रेत्यादिना यदपहतपाप्मेत्यादिनापहताते
नपाप्मपहतपाप्मत्वादिगुणकमात्मानमुपक्रम्य तत्प्रजापतेर्वाक्यात् द्रष्टृत्वोपन्यासात्स्वप्नलिंगेन जीव निश्चया
नैषवन्तेगुणाः संभवतीतिसमुदायार्थः इहप्रजापतिरुते य एष इति प्राधान्यादक्षिपुरुषः सर्वोपाधिविषयदर्शनरूप
जाग्रदवस्थापन्नमित्यर्थः स्वप्नमिति महीयमानः वासनामयैर्विषयैः पूज्यमान इत्यवस्थापर्यायं ॥

मि २

प्र॰
भा॰
८७

मलसंगिनो हि क्रियया मलनाशादैश्वर्य किंतु कस्यचित्सांगीनः स्यादित्याह सुवर्णमिति इत्यंतरेणार्थिवे मलः अभिभूतेत्यस्यावाद्यात्मनभि
अन्येति अग्रसापाद्येभास्वरतादिः सोयं लोकः जीवस्वरूपस्याभिभवे बाधकमाह इहेति विज्ञानघनएवेति श्रुत्या चिन्मात्रस्तावदा
त्मा तेनैतत्संबद्धत्वादिः नत्वमूर्तिमत्त्वं इत्यादिपदवाच्यस्तत्व्यवहारेणानीव स्वरूपमवृत्तिनस्याभिभूतत्वं इष्टो व्यवहारो विरुध्येत देह
भावाद्यवहारेण स्यादित्यर्थः अतस्यापि स्वरूपं हनिष्टुमकमिश्रीकार्यं व्यवहारदर्शनादित्याह तद्वेति अन्यथेत्युक्तं स्फुटयति
सुवर्णादीनां तदन्यांतरसंपर्कादभिभूतस्वरूपाणामनभिव्यक्तासाधारणविशेषाणां तावद्वेषादिभिः शोध्यमानानां स्व
रूपाभिनिष्पत्तिः स्यात् न त्वात्मनस्तत्राद्वीनामसहमभिभवप्रकाशानामभिभावकविशेषयोगात्स्वरूपाभिनिष्पत्तिः स्या
त् न तत्तयोर्वैतस्य ज्ञानिषेधनिमयमकेनचिदभिभवः संभवत्यसंसर्गित्वात् बोधमात्रस्वरूपत्वात् इतिश्रुतिमतिवि
ज्ञातयोर्हि जीवस्य स्वरूपं ननु शरीरादिसमन्वितस्यापि जीवस्य सदानिष्पन्नत्वमेव तर्हि एते सर्वोहि जीवः पश्यन् शृण्वन्म
न्वानो विजानन् व्यवहरत्यन्यथा व्यवहारानुपपत्तेः नन्वेवं शरीरात्समन्वितस्य निष्पन्नत्वे प्राक्समुत्थानात् इष्टो व्यवहा
रो विरुध्येत अतः किमात्मकमिदं शरीरात्समुत्थानं किमात्मका वा स्वरूपेणाभिनिष्पत्तिरिति उच्यते प्राक् विवेकविज्ञा
नोत्पत्तेः शरीरेंद्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादिज्योतिः स्वरूपं भवति यथा शुद्धस्य
स्फटिकस्य स्वात्मस्थं शौक्ल्यं स्वरूपं प्राक् विवेकग्रहणात् रक्तनीलाद्युपाधिभिः विविक्तमिव भवति प्रमाणजनितविवेकग्र भि॰
हणात् पराचीनस्फटिकस्त्वात्मना शौक्ल्येन स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन् तथा देहाद्युपाधिवि
विक्तस्यैव सतो जीवस्य श्रुतिकृतविवेकज्ञानं शरीरात्समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः

82

नत्वेदितिस्वरूपंचेतज्ज्ञानिनएवव्यपेतत्वात् इष्टव्यवहारोच्छित्तिरित्यर्थः अतः सदैव व्यक्तस्वरूपत्वादित्यर्थः सदा हि तु
व्यक्तस्य वस्तुतो संगस्यात्मन आविद्यकदेहाद्यविवेकरूपस्य मलसंगस्य सत्त्वात् तद्विवेकापेक्षया समभ्यस्तादिश्रुतिरित्युत
रमाह अथेति वेदनार्हषशोकादिः अविविक्तमिवेति तादात्म्यसंसर्गस्य कल्पितत्वमुक्तं तत्कल्पितसंसर्गदृष्ट्याज्योपयेति ८७
श्रुतिकृतमितित्वपदार्थश्चमायां विज्ञानमयः प्राणेष्वित्यादावपि सिद्धमित्यर्थः २ ॥

न्मनाशत्वात्मनि शिवबुद्धिं देहेनालोनित्यपनार्थं प्रत्यगनि सिंहविरोचनौ प्रजापतिवाचोदशरावे श्रात्मानमवेत्य यदात्मनो
नविनानीयत्तनेमेत्तुनमिमादित्ताससोनेत्याह उद्देशरावेति उदकशरावेष्वतिविंवात्मानं देहं ह्यात्मस्वात्मानेयतन्मय
वाचमित्यकम्मत्वर्थ: सुन्यापवितार्यामिनिरुपघानस्वेत्रनद्रूकेभवतीति सं वैध: किंमत्कमिप्रतत्राह पदस्येति जीवत्वं
रूपेणानीवंनत्याचष्टेलोकसिद्धत्वान्किंतुतमनुपश्यस्यस्विचारितत्वमोवस्थायोविविच्यस्वरूपं वोधयतिस्रनोय
द्रूस्नतेवापहृतमपप्यत्वादिधर्मकंननीवस्मकंभवतिशोधितस्यत्रस्याभेदेनतद्योक्तेरित्यर्थ: एवमवस्थापन्यासस्वि
उद्देशरावत्रास्यणोनैनेनशारीरात्मनत्तपास्त्वमायेतं त्वेवत इतिश्रुत: एतत्तमेवत्याख्येयत्वेनाहअयस्वप्नसुषुप्तेष्वात्म
क्रमेणापरंज्योतिरूपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेति यदस्यापरमार्थिकंस्वरूपं परंब्रह्मतद्रूपतयैननीवं व्याच
ष्टेननैवेनरूपेणायनन्यपरंज्योतिरूपसंपन्नत्वं श्रुतेनतावद्ब्रह्मतत्त्वापहृतपाप्मत्वादिधर्मकं तदेव चनीवस्यपारमार्थि
कंस्वरूपंतत्त्वमसीत्यादिशास्त्रप्रमाणेनतत्त्वदृष्टयाधिकत्वितं एवदेवहिरण्यादिस्वरूपबुद्धिहेनलक्षणमविद्यानि
र्वतयन्कूटस्थनित्यद्रव्यस्वरूपमात्मानमहंब्रह्मास्मीतिनप्रतिपद्यतेतावज्जीवस्यजीवत्वं यदातदेहेन्द्रियमनोबुद्धि
ना।४ संघातादुव्युत्थाप्यश्रुत्याप्रतिवोध्यतेनासितं देहेन्द्रियमनोबुद्धिसंघातः नासिसंसारीकिंतर्हितत्सत्यंसआत्माचेतन्यमा
त्रस्वरूपस्तत्त्वमसीति तदाकूटस्थनित्यदृक्स्वरूपमात्मानंप्रतिबुध्यास्माच्छरीराद्यभिमानात्समुत्तिष्ठन्सएवकूटस्थनित्य
दृक्स्वरूपआत्माभवति सयोहवैतत्परंब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतिभ्य: तदेवचास्यपारमार्थिकंस्वरूपंयेनशारी
रत्वमन्यायस्वेनरूपेणाभिनिष्पद्यतेकथंपुन: सेवरूपंसेवैवचनिष्पद्यतइतिसंभवतिकूटस्थनित्यस्य
वेकार्थत्वात्रजीवलिंगत्वमपततदप्यसमतंयस्येतिलिंगोपक्रमतिविरोधादितिवतवं ननुजीवत्वब्रह्मत्वविरुद्धधर्मयतो:
कथमभेदस्तत्राह नदेवेति अन्वयव्यतिरेकाभ्यांजीवत्वस्याविद्याकल्पितत्वादविरोधइतिमन्वानस्तेनान्वयमाह
यावदिति व्यतिरेकमाह यदेति अविद्यायामसत्यांजीवत्वंवाक्योत्थप्रवोधात्विद्योतनविद्यत्तिरित्यविद्यकंतदित्यर्थ:
संसारित्वस्याकल्पितत्वेसिद्धेनित्यमुच्यतेति तदेवचास्येति सम्यग्ज्ञानस्वेनरूपेणाभिनिष्पद्यतइत्येतच्छ्रुतिव्याख्यानमाक्षिप
ति कथंपुनरित्यादिना कूटस्थनित्यस्यस्वरूपाभिनिष्पत्त्ययः ॥

प्रग
भा॰
८५

सघष्मै निर्विकल्पत्वात् रूपमात्मा स्वीयत्वमदृष्टाद्यपेक्षत्व इत्याह नहीति बुद्ध्यादिगुणनाशेन लिंगापि काभावादित्यर्थः
एवमवस्थामिरस्यान्तेनोकस्मान्येवत्वतीर्थेपि इस्यत्वेनात इत्याह नयेति श्रुतेरेकदेशानांत्मा इत्यपेति केचित्तिति जीवपरयो
र्भेदादिति भावः श्रुतिबाधान्नेवमित्याह तेषामिति सर्वाद्दीनांजीवएवसर्वनामार्थ इत्यर्थः उक्तसत्त्वपुनरुक्तेभयापियसने
नवत एकात्मत्वात्मानमस्मदर्थे एवोक्तेस्तद्धाय इत्याह भयइति लोकसिद्धजीवान्तवादेनत्रयस्त्वबाधान्नु इतित्वमत्रमुप
संहरति तस्मादिति आत्मानंतरासंभवादित्यर्थः विलयनेशेषान्तेविद्यायामहावाक्येनेतियावत् येनसंसारस्तमपि छ
नहि विलीनेपि नश्योपि पुरि लोपो विघटेविलापितादि तिष्ठतेजन्मवत् तथाचलयोपि विपर्यायेषु नेतेव तेभयोनत्वात्मास्या
मित्योएवान्नेरेन स्यादित्युपक्रमसमत्त्ववकार्येवाइत्याशीवमित्यादिनाद्यपंचनयागेराधु प्राधिसे बंध प्रत्यात्मने तस्मम
मादपाद्यादितिजीवस्तस्यतामिविध्यनन्तरंत्रयस्वरूपापत्रेदर्शयन् परमात्मस्वरूपम्मनाभयस्वरूपास्यजीवदर्श
यति केचित्तुपरमात्मविवक्षयापत्रेवन्तेरितिजीवाक्रांतमायामन्यमानापत्रमेवचात्मापत्रमेतच्चितमपरत्वपाम
ना दिस्मात्कमात्मानेनेभयोनत्वात्मास्यामीतिक्रयापति तेषामेतमिति सत्रिहितत्वत्वेविनीयवेनाम श्रुतिविग्रहक्षेत्र
मयश्रुतिस्त्रापक्षेनपर्यायोनवामिहितस्पर्यायोनतरेणनमिपीपमानत्वात् एतदेवनरइतिवप्रतिज्ञाय प्राक्चनतां
तर्ययारसमस्तमाचक्षाणस्यप्रजापतेः प्रनारुकार्थेप्रमसेनतस्माद्विद्याप्रयुक्तस्यापितस्यपारमार्थिकत्वेरूपक
र्तृभोक्तृत्वाद्येषाद्दोषकल्पितमनेकान्तर्ययामितहितलयनेनतद्विपरीतमपरत्वपामनादिमायाकपारमेश्वरंस्वरूप
विषयाप्रतिपद्यतेसर्पादिविलयनेनेवरत्वादीनपेक्षवादिनः पारमार्थिकमेवजैवरूपमितिमन्यन्ते श्रममदीयमुके
चितेषांसर्वेषामात्मैकत्वमप्यक् दर्शनप्रतिपत्तमनानाप्रतिबाधायेदृशारीरकमारब्धमेकएवपरमेश्वरः कूटस्थनि
त्योविज्ञानधातुरविद्यामायया मायाविवदनेकधाविभाव्यते नान्योविज्ञानधातुरस्तीति यत्विदंपरमेश्वरवाक्ये
नीवृत्ताशोकप्रतिषेधतिसूत्रकारः नासंभवादित्यादिना तत्रायमभिप्रायः नित्यशुद्धबुद्धमुक्तस्वभावेकूटस्थेनैकस्मि
न्नसंगेपरमात्मनितद्विपरीतंजैवंरूपंव्योमीवतलमलादिवत्कल्पितंतदात्मैकत्वप्रतिपत्त्यास्वपरवाक्यैरपोद्यते नैतत्सत्वा
भिनेषामिदंशारीरकमेवोत्तरमित्याह अपरेत्वित्यादिना शारीरकस्यार्थसंक्षेपेणोपदिशन्ति एकएवेति अविद्यामाययाभे ८५
देनिरसितुंसमानाधिकरण्यं श्रावरणविक्षेपशक्तिरूपमाया इति मिथ्याभेदात्मस्वरूपयोगः उक्तसेवाविषयासंसारितत्वतो
न्योजीव इतिशारीरकार्थ इत्यर्थः नहिसूत्रकारः किमितिभेदं ब्रूते इत्याह यदिति परमात्मनोसंसारित्वमिध्यर्थं जीवाद्भेदं ब्रूय
ति तस्मात्संसारित्वनिवृत्त्यभावेतद्भेदोक्तावपिजीवस्य संसारित्वानपायादित्यर्थः ॥

83

ध्यानादि भिन्नत्वेन तदर्थं ज्ञानस्य वाच्यत्वं मात्राणां फलमित्याह केवलेति शरीरत्वस्य सम्बन्धाभावान्मुक्तौ निवृत्तिरायोग्य न
विवेकस्यासंभवादित्याह तथाविवेकेति उक्त अनुमाने प्रमाणं शरीरेष्वशरीरमवस्थितमिति श्रुतेः अविवेकमात्रकल्पितत्वं शरीरत्व
मतो विवेक एव सम्यग्ज्ञानमित्यर्थः ननु स्वकर्मादिभिः शरीरो भवत्युपाधिवशात् कथं जीवत्वस्य स्वरूपाविर्भाव इत्यत आह शरीर
स्यापीति अशरीरत्वं शरीरस्य प्राप्तिवत् प्राप्यत्वं तस्मिन्नेव नाम किं प्रकृतेऽर्थः अविवक्षितं साध्यं तत्र बाधो कस्मादित्याह तथा हीति
अस्मात् शरीरात् समुत्थाय ज्ञानानन्दादिर्भावनिरोधा विविक्ते भेदो [illegible] निरवकाशत्वात् एवमिति अंशादि स्वरूपत्वमसं
केवलात्मस्वरूपानवगतिः [illegible] विवेकाविवेकयोः शरीरत्वं शरीरत्वं नैव भेदः [illegible] अशरीरं शरीरेष्विति शरीरस्य
५२ मिथ्यात्वे तथैकत्वे [illegible] शरीरत्वं विशेषाभावः [illegible] विवेकविज्ञानाभावादनादि स्वरूपः सवि
वेकत्वाना [illegible] तत्त्वाविर्भावः [illegible] स्वरूपेणैव एवमिथ्याज्ञानकृत त:
कर्तृत्वाभावे [illegible] स्वरूपतः [illegible] विशेषात् [illegible] प्रतिपत्त्या [illegible] इति प्रकृतो हेतुरते
इत्युपदेशात् [illegible] ज्ञानविभावाने [illegible]
स्मात्तनोऽस्मात् [illegible] इति स्पष्टमात्मा [illegible] प्रत्यक्षादिवत् प्रस
पिर्द गात् नवाह्निनांयोर्पत्तेः [illegible] आद्य आत्मनि प्रोक्तः एतदेवाह
भयोऽनुमानादनुपक्रमात् किञ्चारम्भत्वे [illegible] नित्यो बोधः [illegible] अप्रमाणत्वे
दृष्टान्तमेवं [illegible] तथा [illegible] नावगतिरेव प्रमाणमिति तथान्यो [illegible] ब्रह्मत्वमेव ब्र
से प्रत्यात्मानं [illegible] अभावविशेषाविज्ञानाभावमेव [illegible] नविका ह्म
नां प्रतिषेधति [illegible] भवतीति [illegible] विज्ञानं विना [illegible] विज्ञानं विनाऽकाश
गत्वमात्मा [illegible] श्रुत्याः विमलाद्यामवहित्वा [illegible] मिथ्यात्वमर्थः एतावन्निवाकार [illegible] मिथ्यामात्मको
तादृशे कस्मात् [illegible] अनुभवनानीति [illegible] अस्यार्थ: [illegible] वाक्यानामेव
रमित्यत आह [illegible] तस्य [illegible] तस्मान्न [illegible] तथा हि दृष्टिरेव तथा [illegible]
त्वज्ञापकत्वात् [illegible] नानात्वबुद्ध्यनुवादात्
त्वेनोक्तः कस्मात् तथेति [illegible] विवेकेति [illegible] तथान्तरीयइति

ग्र
भा
२६

किंच सर्वस्य सूर्यादेस्तद्भास्यत्वात्तद्भासकत्वमित्याह तमेवेति अनुगमनवदनुभानं तद्गतमिति शंकां निरस्यति तमेवेति तत्रेति सम
स्याः सति विषये च साधारण्यात्संशयमाह तत्रेति सूर्यं ज्ञात्मस्फुरणात्तदेव तत्तदाकारा यथा इत्यस्तु हि तमादेश्वरे द्युतिराशिना नथेद्वा विष
तिसमभीव तत्त्वाद्वयेमानायंमानतत्त्वमस्ति सूर्याद्योन भास्यतिस तेजोभिः शेषतद्रूपास्ते इति भविष्यदर्थे द्युतिराशुग्रहणा धातुश्रयुतास्ता
समाने सूर्यादेरनभातीति निरोधादिति दृष्टान्तेन द्रढयति तेजोधात्विति तेजोध्यानं निरोधात्तस्य तेजस्तेजोन्तराणामनभिभवनीयतापत्त
तेजोधातुत्वे लिंगमाह तेजोधातूनामिति यत्तेजस्तेजोभिभावकं तत्तेजस्त्वादित्यादिमित्याह तेजःस्वभावकमिति यस्मिन्नसति सूर्यमाभाति त
दनतद्भातीति विरुद्धमित्यत आह अनुभानमिति ततो निष्कृष्य भानं विवक्षितमिति भावः भासकत्वे विवक्षितानुपपत्तेः सत्यो न भा

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति समामनन्ति तत्र यं भान्तमनुभाति सर्वं यस्य च भासा सर्वमिदं विभाति स
किं तेजोधातुः कश्चिदुत प्राज्ञ आत्मेति विचिकित्सायां तेजोधातुरिति तावत्प्राप्तं कुतः तेजोधातूनामेव सूर्यादीनां भानप्रतिषे
धात् तेजःस्वभावकं हि इदं तारकादि तेजःस्वभावक एव सूर्ये भासमाने दिवा न भासत इति प्रसिद्धं तथा सह सूर्येण सर्वमि
दं चन्द्रतारकादि यस्मिन्न भासते सोऽपि तेजःस्वभावक एव कश्चिदिति गम्यते अनुभानमपि तेजःस्वभावक एवोपपद्यते स
मानस्वभावकेष्वनुकारदर्शनात् गच्छन्तमनुगच्छतीतिवत् तस्मात्तेजोधातुः कश्चिदित्येवं प्राप्ते ब्रूमः प्राज्ञ एवायमा
त्मा भवितुमर्हति कस्मादनुकृतेरनुकरणमनुकृतिः यदेतत्तमेव भान्तमनुभाति सर्वमित्यनुभानं तत्प्राज्ञपरिग्रहेऽवकल्पते
भारूपः सत्यसंकल्पः इति हि प्राज्ञमात्मानमामनन्ति न तु तेजोधातुं कंचित्सूर्यादयोऽनुभान्तीति प्रसिद्धं समत्वाच्च तेजोधातूनां
२४ सूर्यादीनां न तेजोधातुमन्यं प्रत्यपेक्षास्ति यं भान्तमनुभायुः नहि प्रदीपः प्रदीपान्तरमनुभाति यदप्युक्तं समानस्वभावकेष्वनुका
रो दृश्यत इति नायमेकान्तो नियमः भिन्नस्वभावकेष्वपि ह्यनुकारो दृश्यते सुतप्तोऽयःपिण्डोऽग्न्यनुकृतिरग्निं दहन्तमनुदहति भौमं वा यथा २
रजो वायुं वहन्तमनुवहतीति अनुकृतेरित्यनुभानमसूसुचत् तस्य चेति च चतुर्थं पादमस्य श्लोकस्य सूचयति तस्य भासा
सर्वमिदं विभातीति तद्धेतुकं भानं सूर्यादेरुच्यमानं प्राज्ञमात्मानं गमयति ॥

नहि भास्वरं भासकः परमात्मा स्वप्रकाशकोऽवग्राह्य इति सिद्धं तमाह भारूप इति भारूपत्वं स्वप्रकाशत्वं भासकत्वार्थं मुक्तं तत्र श्रुति
माह भारूप इति मानाभावाच्च तेजोधातुर्न ग्राह्य इत्याह नत्विति किंच सूर्यादयस्तेजोन्तरं भानमनु न भान्तीति तेजस्त्वात्प्रदीपवदित्याह २६
समत्वाच्चेति योऽयमनुकरोति स तज्जातीय इति नियमो नास्तीत्याह नायमेकान्त इति येन कृत्स्नमाभासकत्वानुवादपूर्वकं सूत्रांशे
हेतुत्वं व्याचष्टे अनुकृतेरिति तमेव भान्तमित्येवकारोक्तेज्ञानं विना सर्वस्य भानाभावरूपमनुभानं हेतुस्तेनोक्त
मनु

84

यथा — न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तन्ते तद्धाम परमं मम १५

बुद्ध्युपाधिप्रधानस्य कल्पितत्वाद्द्वैतस्य कल्पितस्याधिष्ठानात्तत्त्वस्य कम्भिमाह जीवस्यापीति कल्पितभेदानुवादस्य फलमाह एवं हीति सत्येव भेदानोत्पत्ति भेदनिरसनमिति प्रतिपाद्यमिति आभेति तत्पराहं नीत्यादिसूत्राणि आदिपदार्थः अन्वेद्वैतस्य शास्त्रार्थत्वे द्वैतापेक्षविधिविरोधस्तत्राह वर्णितेति अद्वैतमज्ञानतः कल्पितद्वैताश्रया विधयो न विरुध्यन्त इति सर्वमनुपपन्नमित्यर्थः एवं सत्यपि ताक्षेमी वा न वादेन अन्यत्र पदार्थपरत्वाभावा पुनः जीवेन तदसंभवान्न जीवो दहरवाक्ये तर्हि जीवपरामर्शस्य का गतिरित्यत आह अन्यार्थश्चेति सूत्रं व्याचष्टे अथ यत्रादिना प्रकृते दहरवि

जीवस्यात्मनः परस्मात् स्वरूपत्वं प्रतिपिपादयिषति किं तन्नवदन्ते वा विद्याकल्पितं लोकप्रसिद्धं जीवभेदं एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्ते इति मन्यन्ते प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यादिना वर्णितं त्वास्माभिर्विरुद्धेन दहरेण कर्मविधिविरोधपरिहारः अन्यार्थश्च परामर्शः २० अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः अथ य एष संप्रसाद इत्यादिः स दहरे परमेश्वरे व्याख्यायमाने न जीवोपासनोपदेशः न प्रकृतविशेषोपदेश इत्यनर्थकत्वं प्राप्नोति तत आह अन्यार्थोऽयं जीवपरामर्शः न जीवस्वरूपपर्यवसायी किं तर्हि परमेश्वरस्वरूपपर्यवसायी कथं संप्रसादशब्दोदितो जीवो जागरितव्यवहारे देहेन्द्रियपञ्जराध्यक्षो भूत्वा तद्वासनानिर्मितांश्च स्वप्नान् नाडीचरोऽनुभवन् श्रान्तः शरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात् समुत्थाय सुषुप्ते परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानवत्त्वं परित्यज्य स्वेन रूपेणाभिनिष्पद्यते स एष यदुपसंपत्तव्यं परं ज्योतिः येन स्वेन रूपेणायमभिनिष्पद्यते स एष आत्मापहतपाप्मत्वादिगुण उपास्य इत्येवमर्थोऽयं जीवपरामर्शः परमेश्वरवादिनोऽप्युपपद्यते अल्पश्रुतेरिति चेत्तदुक्तम् २१ यदप्युक्तं दहरोऽस्मिन्नन्तराकाश इत्याकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते जीवस्य त्वाराग्रमात्रस्याल्पत्वमवकल्पत इति तस्य परिहारो वक्तव्यः उक्तो ह्यस्य परिहारः परमेश्वरस्यापेक्षिकमल्पत्वमवकल्पत इत्यर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेत्यत्र स एव परिहार इहाप्यनुसंधातव्य इति सूत्रयति श्रुत्यैव च तदल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति अनुकृतेस्तस्य च २२ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः

शेषोऽयमात्मत्वपदेशोऽपि नेत्यर्थः तत्र दहरवाक्यशेषरूपं संप्रसादवाक्यमाशंक्य पूर्वं कं दहरसूत्रप्रसंगेन व्याचष्टे कथमित्यादिना उपास्यत्वादल्पत्वमपेक्षितमिति व्याख्यायमानं निरस्यन्नाह अर्भकौकस्त्वादिति एवं दहरवाक्ये परामर्शो निर्गुणोऽपि च सम्भवतीति सिद्धं अनुकृतेस्तस्य च सूत्रं व्याख्यातुं मुण्डकवाक्यमुदाहरति न तत्रेति तस्मिन्नित्यादि विषये न भाति न प्रभासयतीति यावत् यदा चेदमात्मकतादिकं भासयति तदा स्वदीप्त्या कथमाह तमेवेति ॥ ॥ ॥

शब्दादेवप्रमितः ॥ काठकवाक्यं पठति अंगुष्ठेति पुरुषः पूर्णो मध्य आत्मनि देहमध्ये यदंगुष्ठमात्रं हृदयं तत्र तिष्ठतीत्यंगुष्ठमात्र उच्यते तमेव परमा त्मत्वाद्विवाक्यांतरमाह तथेति अधूमकमिति पठन्तो येयमंगुष्ठमात्रो जीवः स चक्तनो निर्धूमज्योतिर्वन्निर्मलप्रकाशरूप इति लम र्यसंशयोपलक्षणमन्यदाह ईशानइति तत्साधितीयमाह सएवेति कालत्रयेपिसएवाच्छिन्नरूप किंचिन्नविकेनसाक्षादंगुष्ठसम देहदेवमर्थः परिमाणोपात्तजीवशष्टशक्यासंशयमाह तद्वेति यथानभानादिति मातत्तिज्ञाधानादेहोपासर्यायगोचरोऽष्टमकेन यामयमसूकतपरिमाणालिंगात्जीवस्यतोतात्वीयत्वेनाम्नीति प्राप्तेहीति विषयमाह एवं शानपरं वाक्यमिति पूर्वपक्षयति तत्र

शब्दादेवप्रमितः २४ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति श्रूयते तथांगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य सएवाद्य सउश्वएतद्वैतदिति च तत्र योयमंगुष्ठमात्रः पुरुषः श्रूयते सकिं विज्ञानात्मा किंवा परमात्मेति संशयः तत्रपरिमाणोपदेशात्तावद्विज्ञानात्मेति प्राप्तं नह्यनंतायामविस्तारस्य परमात्मनोंगुष्ठपरिमाणमुपपद्यते विज्ञानात्मनस्तूपाधिमत्वात्संभवति कयाचित्कल्पनयांगुष्ठमात्रत्वं स्मृतेश्च अथसत्यवतः कायात्पाशबद्धंवशंगतं अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलादिति नहिपरमेश्वरो बलाद्यमेन निष्क्रष्टुंशक्यः तेन तत्र संसार्यंगुष्ठमात्रोनिश्चितः सएवेहापीत्येवंप्राप्तेब्रूमः परमात्मैवायमंगुष्ठमात्रपरिमितः पुरुषोभवितुमर्हति कस्माच्छब्दात् ईशानो भूतभव्यस्येति नह्यन्यः परमेश्वराद्भूतभव्यस्य निरंकुशमीशिता एतद्वैतदिति च प्रकृतं पृष्टमिहानुसंदधाति एतद्वैतद्यत्पृष्टंब्रह्मेत्यर्थः पृष्टंचेहब्रह्म अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्रभूताच्चभव्याच्च यत्तत्पश्यसि तद्वदेति शब्दादेवाभिधानादीशानोभूतभव्यस्येति परमेश्वरोयमिति गम्यतइत्यर्थः कथंपुनः सर्वगतस्य परमात्मनः परिमाणोपदेश इत्यत्र ब्रूमः हृद्यपेक्षयातुमनुष्याधिकारत्वात् २५ सर्वगतस्यापि परमात्मनो हृदयेवस्थानमपेक्ष्यांगुष्ठमात्रत्वमिदमुच्यते आकाशस्येव वंशपर्वापेक्षमरत्निमात्रत्वं नह्यंजसातिमात्रस्य परमात्मनो हृदयेवस्थानमपेक्ष्यांगुष्ठमात्रत्वमुपपद्यते

परिमाणोति पूर्वपक्षेब्रह्मलिंगानां जीवोपाधिः सिद्धांतेत्वंगुष्ठमात्रत्वानुपपत्तिर्गुणमयोमोदेहस्य विचारोपसंहृत्वमिति भेदः कयाचिदिति अंगुष्ठमात्रहृदयस्थबुद्ध्युपहितत्वरूपभेदाध्यासकल्पनयेत्यर्थः स्मृतिसंवादादप्यंगुष्ठमात्रो जीवइत्याह स्मृतेश्चेति अथसत्यवतः शरीरात्पाशैर्बद्धं कर्मवशंप्राप्तमित्यर्थः तत्रापीश्वरः किंनस्यादित्यतआह नहीति प्रभवतिसंयु मनेन मृत्यापि विस्मृतिरित्यमुख्यरतियमस्य स्मरणादिति भावः भूतभव्यस्येत्यपहाराधकाभावाच्चेशान इतीशानत्वशब्दाद्विर कुशमीशिताभातीति अस्मात्लिंगवाक्यमितिसिद्धान्तयति परमात्मैवेति प्रकरणाच्च ब्रह्मपरमिदं वाक्यमित्याह एतद्विति द्वैवाक्यलिंगाद्वेलमितापामाह शब्दादिति करः सकलिंगश्रुतिः ॥ ॥ ८१

85

आत्मनः सूर्यादिभासकत्वं सत्यं न प्रसिद्धमविरुद्धं चेत्याह । न तद्भासयत इति सर्वेशब्दः प्रकृतसूर्यादिवाचकत्वेन व्याख्यातः संप्रति तस्यासंकुचद्वृत्ति
तामन्यार्थान्तरमाह अथवेति न तत्रेति सर्वं नाम सूक्ष्मा ... [illegible] ... मित्याह नमक्षसूर्य इति किं च ... [illegible] ... कत्वादयं
त्रोधसत्पर इत्याह अन्ये त्वेवमिति द्विरूपमेवमाति ... [illegible] ... न शुक्तिरजतादिवत् ... [illegible] ... कमलसूक्ष्मानिषु
तेनिरवयवचश्च ... [illegible] ... सिद्धमित्यर्थः सतिसप्तमीपक्षमनुवदति यद्यपीति सूर्यादिप्रतिभावके
तेजो ... [illegible] ... नतत्रप्रमाणमस्तीत्याह तत्रेति सिद्धे ... [illegible] ... कथमित्याशङ्क्याह ब्रह्मरूपी
न तद्भासयति ... [illegible] ... तेजोऽन्तरेणापेक्ष्यते ... [illegible] ... च तेजोऽन्तरेणापेक्ष्यते
तस्य प्रतिभासनात् ... [illegible] ... किं तद्भिन्नं सिद्धमित्यविशेषेण तैः
सर्वे ... [illegible] ... सर्वस्य
रूपनाशस्याभिव्यक्तिर्न हि ... [illegible] ... प्रकृतेन च ... [illegible]
... [illegible] ...
... [illegible] ... न तत्र सूर्यो भातीति ... [illegible] ... सूर्योऽपि
... [illegible] ...
... [illegible] ...
... [illegible] ... श्रुतिश्च ... २७ ... [illegible]
... [illegible] ... यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेति यदादित्य
गतं तेजो जगद्भासयतेऽखिलम् यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति च

ति सतिसप्तमीपक्षे न भातीति ... [illegible] ... विरोधनिरासाय
विषयसप्तमीपक्षे ... [illegible] ... विषयेऽर्थादेर्भासक
... [illegible] ...
... [illegible] ...
... [illegible] ...
... [illegible] ... सिद्धं ॥

ब्र॰
भा॰
२८

एकत्वार्थं वाक्यशेषमनुकूलयति एतदिति । ज्ञातिर्यमो वा कर्त्ता इह ह्युक्ताः तेनैवैतद्वेदमुपलक्ष्य कृपार्थं यद्यावत्स्वदेहादीन्द्रियनिग्रहादिना ते विविक्तमात्मा
नेत्युक्तस्वप्रकाशमसत्कृदृष्टं ब्रह्मत्वानीयादित्यर्थः । तस्मात्तदेवाङ्गुष्ठमात्रत्वं ब्रह्मणो हृदयस्थानविनिमित्तमिति सिद्धं । शास्त्रस्य मनुष्याधिकारत्वे
देवादीनां ब्रह्मविद्यायामप्यनधिकारः स्यादित्याशङ्क्याह तदुपर्यपीति । ननु मनुष्याणामेवाधिकारश्चिन्तनसंगतेत्यत आह । अर्थेति
सूत्रेण तत्प्रतिपादने ह्रेतुप्रसंगः अन्नमनुष्याधिकारत्वेनामाम्नातानां देवादीनां वेदान्तश्रवणाद्यनधिकारो लिङ्गविशिष्टदेहे मनुष्यत्वावेदा
ण्णाद्यसंभवात्तेषामित्याह । बाढमिति । एवमधिकारविचारात्मका एकस्मात्तद्यस्य शास्त्रस्य संगतिः । अत्र पूर्वपक्षे देवानां तत्त्वा
नधिकारादेवत्वप्राप्तिद्वारा क्रममुक्तिफलत्वाद्दहरायुपासनास्वाक्रममुक्त्यर्थिनां मनुष्याणामप्रवृत्तिः फलेसिद्धान्तेन प्रवृत्तिरुपास
पतमेवार्थं परेणास्पष्टीकरिष्यति । अङ्गुष्ठमात्रः पुरुषो नराणामसदाजनानां हृदये सन्निविष्टः तेषामङ्गुष्ठमात्रत्वं तु जातिविशे
कांधैर्येणातेविद्यानुक्रमस्तत्वमिति । तदुपर्यपि बादरायणः संभवात् २१ अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षया मनु
ष्याधिकारत्वाच्छास्त्रस्येत्युक्ते तत्प्रसंगेनेदमुच्यते । बाढं मनुष्याणामधिकारो तिशास्त्रं न तु मनुष्याणामेवेति हि ब्रह्मत्वाने नियमो
ऽस्ति तेषामपि मनुष्याणामुपरिष्टाद्ये देवादयस्तानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते कस्मात्संभवात्
संभवति हि तेषामप्यर्थित्वाद्यधिकारकारणं तत्रार्थित्वं तावन्मोक्षविषयं देवादीनामपि संभवति विकारविषयविभूत्य
नित्यत्वालोचनादिनिमित्तं । तथा सामर्थ्यमपि तेषां संभवति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्
न च तेषां कश्चित्प्रतिषेधोऽस्ति । न चोपनयनशास्त्रेणैषामधिकारो निवर्त्येतोपनयनस्य वेदाध्ययनार्थत्वात्तेषां च स्वयंप्रति
भातवेदत्वात्
तामिदं वक्तव्यं शास्त्रोपनिषत्प्रमाणादिनात्मनामनुक्तिसंभवादितिप्रसक्तेऽयं विचारः । ननु भोगासक्तानां तेषां मोक्षार्थित्वा
भावान्नाधिकार इत्यत आह । अर्थित्वं तावदिति । विकारत्वेनानित्यत्वविषयस्यावस्थात्रयासन्यादिदोषदर्शनादिति शापसंभवमोक्षार्थि
त्वसत्वप्रकृतीनां देवानां संभवतीत्यर्थः । ननु विग्रहस्याऽभावाद्देवतानामर्थज्ञानशक्तिराहित्यादिलिङ्गविग्रहवती देवता नास्ति शापग्रहस्या सामर्थ्या
न्नाधिकार इत्यत आह । तथेति । अर्थित्ववदित्यर्थः । अपर्युदस्तत्वमाह । न च तेषामिति । शूद्रोऽयं तेन न वस्तुमहतीति वद्देवादीनां विद्याधि
कारनिषेधो नास्तीत्यर्थः । ननु विग्रहवत्त्वेनदृष्टसामर्थ्यसमप्युपनयनाभावादध्ययनाशक्तीयसामर्थ्यं नास्तीत्यत आह । न चेति । जन्मा
न्तराध्ययनबलात्स्वयमेव प्रतिभाताः स्मृता वेदा येषां ते तथा तद्भावादित्यर्थः । बलादिषु प्रविष्टः पिशाचादीनां वेदाद्युपदर्शनात्
देवयोनीनां जन्मान्तरस्मरणमस्तीति स्मृतवेदानामनामर्थविचारो युक्त इत्यर्थः ॥ ॥ ॥ ९८

86

मुख्यो गौणश्चेत्युक्तौ वोपत्युक्तं किं गौणाथ इत्यत आह नचास्य इति सति संभवे मुख्यग्रहो न्याय्यः अत्र न जातिविधानात् संभवति गौणग्रहणम् यं मनुष्याणामेवेति त्रैवर्णिकानामेवेत्यर्थः शाक्तत्वादिमत्त्वेन पश्वादीनां देवानामृषीणां चाधिकारो वा तिः तत्र पश्वादीनां शास्त्रार्थज्ञानादिसा मर्थ्याभावात् कर्मण्यशक्तिः इन्द्रादेः स्वदेवताके कर्मणि स्वोद्देशेन द्रव्यत्यागयोगस्याशक्तेः ऋषीणां मार्षेयवरणे स्वार्षेयाभावादशक्तिरर्थि त्वादिमत्त्वेन निष्कामानां मनुष्याणामपि श्रवणं चाधिकारो वा तिः तत्र मनुष्याणां शूद्रस्थित्वेनितरादि पृथिकारो न काम्येषु शूद्र विद्यानां मोक्षार्थित्वे श्रवणं द्विजातीनां पृथिकारेण कर्मस्वितिमतम् शूद्रस्याधिकारे निरस्यति अपशूद्राधिकरणादिति शूद्रस्य वेदत्वादिति पर्यु दासात् उपनयीत तमध्यापयीतेति शास्त्रात् न शूद्रस्य वैदिके कर्मण्यधिकारः तत्रैकजातिर्न तस्मात्तत्पत्य नप्रयुक्तं द्विजत्वाभावेन वेदाध्य नाभावात् अत्रापेक्षितो न्यायः पष्ठाध्याये वर्णितं तमिहाह वर्णितमिति स्वर्गकामाय जैमिनिना द्वितीयस्य विशेषणस्य वा न्यफलार्थिनः प्रतिप्रसवेन

नचाग्नयः परमात्मनः इत्यस्याभेदेति ईशानस्या प्रीत्यर्थत्वे ननु प्रतिषिद्धभेदं द्रव्यानामन वस्थितत्वात्तदपेक्षम यं नियममात्र त्वेनोपपद्यमत्र समतदुत्तरमु चाते मनुष्याधिकारत्वादिति शास्त्रस्य विशेषण हेतुमपि मनुष्याणां चाधिकारोतिपात्कत्वादर्थित्वात् अर्थ द्रव्यत्वाद्युपनयनादिसंस्कृता वेति वर्णितमेतदधिकारत्वाद्य मनुष्याणां नियतपरिमाणः कायश्चिन्तेन नियतपरिमाण मेव चेषां संग्रहमात्रं द्रव्यं ग्रीहीमनुष्याधिकारत्वात् स्वमनुष्यहृदयावस्थानापेक्षमंगुष्ठमात्रत्वमुपपन्नं परमात्मनः यदयुक्तं परिमाणेमपदेशान्तरस्य संसारिणो वायमंगुष्ठमात्रः प्रमेत इति तत्त्वमसीत्यादिवत् संसारिण एव ब्रह्मणो गुष्ठमात्रस्य ब्रह्मत्वमिहोपदिश्यत इति द्विरूपाहि वेदान्तवाक्यानां प्रवृत्तिः क्वचित्परमात्मस्वरूपनिरूपणपराणि क्वचि नात्मनः परमात्मैकत्वोपदेशपराणि तदिज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते नाङ्गुष्ठमात्रत्वं विवक्ष्यत इति ॥

त्वान्याधिमात्रस्य स्वाधिनाश्रफलार्थं कर्मणि पश्वादीनामनधिकार इत्याशंकामकरीमानेषां साकल्याभावात् स्वर्गकामपदं मनुष्यपर तया संकोच्यमनुष्याधिकारत्वेस्थापितेचात्रवेऽपनाधिकारमाशंकावसंते ब्राह्मणोपनीतः शीतं यदीत्यारोजन्यः यश्च दिवेश्य इति त्रयाणा मेवाग्निसंबन्धश्रवणात्तेषामेवाधिकार इति वर्णितमित्यर्थः अस्तु प्रस्तुते किमायातं तत्राह मनुष्याणां चेति प्रायेणास्य प्रविनत्तिपरिमितो मनुष्यदेहस्तदर्थः एवं मनुष्यहृदयस्यापि प्रादेशमात्रत्वात् तदवच्छिन्नस्य हृदये तिष्ठतो ब्रह्मणोऽङ्गुष्ठमात्रमुपलक्षणमिति ब्रह्मणो भेदो बोध्य इति सम्बन्धेन मनुवदति यदपीति प्रतिपाद्याभेदविरोधात् ब्रह्मवादेनाङ्गुष्ठमात्रत्वं वाधंतात्पर्यं वस्तु वल्लवत्वादिमाह नदिति कश्चिदस्य न निमादौ कश्चित्तत्त्वमसीत्यादौ ॥

या
भा
८१

एकरूपापि देवस्यैवात्मा बलादनेकदेहप्राप्तिः प्राप्तिरस्य निर्दर्शनार्थं भवति अनेनानर्कर्मणि विरोधः इति चत्व कस्माद्धिंसा हिंसा वेयं देवस्यभ्रे
प्राप्यमानदेवाः कतीति शाकल्येन पृष्टो याज्ञवल्क्यो निविदा त्रयस्त्रिंशतादिरूपया त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा देवसंख्यावाचकः शब्दः षडिधि
कानि त्रीणि शतानि सहस्राणीति महिम्नो ह्येते एषां त्रयस्त्रिंशत्त्वेव देवा इति महिमानो विभूतयः सर्वे देवा एषां त्रयस्त्रिंशद्देवानां मनोऽष्टौ वसवः एकादश
रुद्राः द्वादशादित्या इन्द्रः प्रजापतिश्चेति त्रयस्त्रिंशद्देवदेवास्तेऽपि षण्णामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानस्ते षड्देवेषु तर्भवन्ति
षट्देवास्त्रिषु लोकेषु त्रयस्त्रयो द्वयोरन्नप्राणयोः द्वौ चैकस्मिन् प्राणे हिरण्यगर्भे तर्भवन्तीति दर्शितमित्यर्थः त्रयस्त्रिंशतोऽपि देवतानामिति

कस्मादनेकप्रतिपत्तेरेकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः संभवति कथमेतद्देवयाम्यते दर्शनात् तथाहि कति
देवाः स्तुपकस्य त्रयस्त्रिंशतीच शतानस्त्रयस्त्रिंशच षट् स्रेतिनिरुच्य कतमेते इत्यस्य पृष्टायां महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा
इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतां दर्शयति तथा त्रयस्त्रिंशतोऽपि षडादिक्रमेण क्रमेण कतम एको देव
इति प्राण इति प्राणैकरूपतां देवतानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति तथा स्मृतिरपि प्राप्तानो वै
शरीराणि बहूनि भरतर्षभ योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् प्राप्नुयाद्विषयान् कैश्चित्कैश्चिदुग्रं तपश्चरेत् संक्षिपेच्च पुन
दे४ स्तानि सूर्यो रश्मिगणानिवेत्येवं जातीयका अणिमाद्यैश्वर्यप्राप्तानां योगिनामपि युगपदनेकशरीरयोगं दर्शयति किमु वक्तव्य
माजानसिद्धानां देवानामनेकरूपप्रतिपत्तिसंभवा वैकैका देवता बहुभिः रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं
गच्छतीति परैश्च न दृश्यते अन्तर्धानादिक्रियायोगादित्युपपद्यते अनेकप्रतिपत्तिदर्शनादित्यस्यापरा व्याख्या विग्रहवतामपि क
र्मांगभावचोदनास्वनेका प्रतिपत्तिर्दृश्यते क्वचिदेकोऽपि विग्रहवाननेकत्र युगपदङ्गतां न गच्छति यथा बहुभिर्भोजयद्भिर्नैको ब्रा
गमयि२

बधः दर्शनं श्रौतं व्याख्याय स्मार्तं व्याचष्टे तथा स्मृतिरिति बलं योगसिद्धिरणिमा महिमा चैव लघिमा प्राप्तिरीशिता प्राकाम्यं च व
शित्वं च यत्रकामावसायितेत्यष्टैश्वर्याणि तत्राणिमाणुर्भवति महान् लघुर्गुरुश्च भवति योगवशात्प्राचेष्टस्पर्शः प्राप्तिः ईशितास्य शिता तिः
प्राकाम्यमिच्छानभिघातः वशित्वं नियमनशक्तिः संकल्पमात्रादिष्टलाभो यत्रकामावसायितेति भेदः अन्नानसिद्धा नस्त्र न्मना
सिद्धानामित्यर्थः फलितमाह अनेकेषु कर्मस्वेकस्य प्रतिपत्तिरङ्गभावः तस्य लोके दर्शनादिति व्यतिरेकमाह क्वचिदेक
इति ॥

१७

देवानां च ऋषीणां च विद्याधिकारे कारणमर्थित्वादिकमुक्त्वा ब्रह्मचर्यादिकमुक्तमित्याह अपि चेति ननु ब्रह्मविद्यायां देवादीनामधिकारो निवे दार्थत्वात् अग्निहोत्रवदित्यत आह यदपीति देवानां कर्मस्वनधिकारः देवतान्तराभावादित्युक्तं ऋषीणामनधि कारः ऋषयन्तराभावात् ऋषिप्रकेकर्मत्वमपि कर्मविद्यासाधारणाधिकारिविशेषणत्वेन तदनधिकारः इत्यर्थः अत्रापि सामर्थ्यरूपं कारणमि त्यर्थः न हि विद्यायां सामर्थ्यं स्यादिति भावः तथा यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणामिति वाक्यशेषोऽप्यनुमानम् ननु देवादीनामङ्गुष्ठमात्रश्रुतिः कथं तेषां महादेहत्वेन हृदयस्यासंभवादङ्गुष्ठमात्रत्वाभावात् अतः श्रुतिस्तेषां नाधिकारः इत्यत आह देवाद्य

अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्यादि दर्शयति एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास भृगुर्वै वारुणिः वरुणं पितर मुपससार अधीहि भगवो ब्रह्मेत्यादि यदपि कर्मस्वनधिकारकारणमुक्तं न देवानां देवतान्तराभावात् न ऋषीणामा र्षेयान्तराभावादिति न तद्विद्यासु अस्ति न हीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किंचित्कृत्यमस्ति न च भृ ग्वादिसगोत्रतया तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते देवाद्यधिकारेऽप्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् २७ स्यादेतत् यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधि कारो वर्ण्येत विग्रहवत्त्वादृत्विगादिवदिन्द्रादीनामपि स्वरूपसंनिधानेन कर्माङ्गभावोऽभ्युपगम्येत न च संभवति बहुषु यागेषु युग पदेकस्यैन्द्रस्य स्वरूपसंनिधानानुपपत्तेरिति चेत् नायमस्ति विरोधः ॥२७॥ यदि कर्माङ्गभावोऽभ्युपगम्यते तदा विरोधः कर्मणि स्यात् न हीन्द्र इन्द्रादीनां स्वरूपसंनिधानेन यागे ॥२८

धिकारेऽपीति ननु मन्त्रादीनां प्रतीयमानविग्रहवत्त्वे तात्पर्याभावात्तथात्वे देवादीनामधिकारः उक्तः स चायुक्तः अन्यपराणां तेषां प्रम त्वादि विरोधेन स्वार्थतात्पर्यकल्पनानुपपत्तेरित्याक्षिप्य सूत्रं चतुष्टयेन परिहरति विरोधः कर्मणीत्यादिना वर्णितं तन्नेति शेषः स्व रूपं विग्रहः अभ्युपगमे प्रयासेन देवताः स्वेतन चहृयन्ते अतो योग्यानुपलब्ध्या देवताया विग्रहवत्त्वस्याभावान्न प्रदानकारक भावेन कर्मनिष्पत्तिः स्यादित्याह नेति चेति विग्रहं सांगानन नुपलब्धिबाधिते प्रकाशे चन संभवतीत्याह नेति तस्माद्दर्शा पत्तिं न राज्ञः प्रयत्नदेवतानस्याश्चेतनत्वान्न विद्याधिकार इति शंकार्थः परिहरति नायमिति ॥

न्या० मा० ९

यथा गोत्वस्यैव गवादिशब्दवाच्यत्वं न तावत् सत्ताजात्याकृतयो वस्त्वादिशब्दार्थः नव्यमतमिति परिहरति नेत्यादिना शब्दानां तदर्थानां जाती
नां नित्यत्वात् सम्बन्धोऽपि नित्य इति प्रतिपादयति नहीत्यादिना व्यक्तीनामानन्त्यादिति न चानन्त्यादेव व्यक्तिषु शक्तिः सम्बन्धो वाच्यो
सामान्यस्याप्यसामान्यतिरेकेण सर्वेषु व्यक्तिषु अस्य समभावाद् इत्येषा व्यक्तिरेव व्यक्तिरिति यदपि तथापि तच्छक्तिनियमितत्वात् नियतत्वात् निरूपयन्
व्यक्तिवाच्यत्वे गौरवेनानन्त्यलक्षणत्वमावाह्यतिभावः यद्वा केवलव्यक्तिषु शक्तिरत्र नियमेनानुपपत्तिरिति विनैव व्यक्तेः शब्द
सामान्यतज्जातिस्थानविषयत्वेन तु भयशालेन एवं पृथक्त्वात् तथा च नियमनातिरिक्तस्य जात्यादेरनादिशक्तत्वात् गोत्वघटत्वादि
सम्बन्धवाद् अतएव वाक्येऽपि न सम्यग्देवाकाराल तदाकारप्रयुक्ते केवलसामान्यस्य वाच्यत्वे व्यवहार्यस्य वाच्यैकदेश
त्वाभावात् अतः प्रभवादि सिद्धत्वात् केवलव्यक्तिनिरासार्थम् केवलव्यक्तिवचनात् अन्यत्र लक्षणादि शब्दार्थो शक्ति ७

नगवादिशब्दार्थसम्बन्धनित्यत्वदर्शनात् नहि गवादिव्यक्तीनां नित्यत्वेन तदाकृतीनामपि तु नित्यत्वे स्यात् इत्यनुग
कर्मणां हि न्यायपद्धतौ नाकृतयः आकृतिभिश्च शब्दानां सम्बन्धोऽपि न व्यक्तिभिः व्यक्तीनामानन्त्यात् सम्बन्धग्रहणा
नुपपत्तेः व्यक्तिशून्यसमानाकृतीनां नित्यत्वाद् गवादिशब्दस्य क्वचिद्विरोधो दृश्यते तथा देवादिव्यक्तिप्रभवप्र
यामेष्वाकृतिनियतत्वेऽपि क्वचिद् हस्त्यादिशब्देषु विरोध इति दृष्टम् आकृतिविशेषस्य देवादीनां मन्त्रार्थवादादिभ्योऽवि
गतत्वलाघवगमादर्शनत्वं स्थानविशेषसम्बन्धनिमित्तशब्दादिशब्दाः संज्ञाप्रमादिशब्दवत् नतस्यापि पतस्तस्या
नष्टविरोध इति सदसद्भ्रादिशब्दैरभिधीयते इति नदोषो भवति नचैवं शब्दप्रभवत्वस्यप्रभवत्वं उपादानकारण
मिष्यते ऽर्थते कथं तर्हि स्थितेन वाच्यकात्मता नित्यशब्देति न्यायसम्बन्धोऽनिशब्दस्य व्यवहारयोग्यार्थव्यक्तिनियमितेः

नेत्यभावितः सांकेतिकाः गवादिशब्दा न तु व्यक्तिप्रभवदेवत्वेन प्रमोदवत्सान्तोऽतिनव्यक्तिमात्रवचनाः सांकेतिकाः किन्तु स्थूलसूक्ष्म
भावनानुसृतव्यक्तिविनाभूतसामान्यवचना इति सम्बन्धः नचैवं शब्दादिव्यतिरेकत्वेन जात्यभावादाकाशशब्दवत् इदं च शब्दादिशब्दाः
केवलव्यक्तिवचना इति प्रतिपत्ती तानानात्वव्यक्तिभेदे न जात्युपपत्तेरिति लक्षणं चेन इष्टात्मव्यपदेशमन्यदापत्तिकमाह व्यक्ति
स्थित्यादिना आकृतिजातिः नत्वकारान्यव्यक्तिः यदनुगते द्रव्यादिजातिः शब्दार्थः सादित्यत आह आकृतिविशेषस्थितिर्वत्र
रूपः पुरन्दरत्वादिभ्यस्त्वर्थः इन्द्रादिशब्दप्रवृत्तिनिमित्तमित्यर्थः कदापि निमित्तमाह स्थानेति व्यक्तिप्रलयेऽपि स्थायित्वात् स्वार्थसम्ब
न्धनित्यत्वेमाह तत्रैवेति उक्तपूर्वापरविरोधं परिहरति नचेति ॥

४४

१०

प्राकृतोपयुक्तमन्वयदर्शनमाह कृतिश्चेति कर्मण्यविरोधमङ्गीकृत्य शब्दप्रामाण्यविरोधमाशङ्क्य परिहरति शब्द इति चेदिति
मानपूर्वे नित्यसंबन्धाभावमेवार्थः श्रौतानि कस्तत्रैव शब्दार्थयोरनादेः संबन्धस्यानादित्वात् देवस्य सावयवत्वे तत्त्वेन प्रामाण्यमुक्तं
इदानीं प्रतिनियतविग्रहवत्त्वमभ्युपगम्येतत्संबन्धस्यानित्यत्वान्नानादेरिन्द्रादिकित्वाच्छब्दस्य संकेतः पुरुषकृतोऽस्त्विति नानादेः
तत्त्वतामामाण्यस्याविरोधः स्यादित्याह कथमित्यादिना किं शब्दानामनित्यतयासंबन्धस्यकार्यत्वमापाद्यते उतार्थानामनित्यत्व

कृतिश्चैकोऽपि विग्रहवाननेकत्र युगपदन्तर्धानं च गच्छति यथा वज्री प्रतिनियतसंबन्धोऽपि कोशादीनां प्रयागे प्रसिद्ध्यते
तद्विदित्वा स्वपरिमाणात्मकत्वात्तामस्य विग्रहवतीमध्येकादेवतामुद्दिश्य वदद्वः स्वसंदर्शे युगपत्सरित्स्थेति
न॰ विग्रहवत्त्वेऽपि देवानां किंचिन्न विरुध्यते शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां २८ मा नाम विग्रहव
त्त्वेऽपि देवा [illegible] नामभ्युपगम्यमानेकर्मणि कश्चिद्विरोधः प्रसंजितस्तु शब्दे तु विरोधः प्रसज्येत कथमौत्पत्तिकं हि श
ब्दस्यार्थेन संबन्धमाश्रित्य नपेक्षत्वादिति वेदस्य प्रामाण्यं स्थापितम् इदानीं तु विग्रहवती देवताभ्युपगम्यमानायद्यपि ऐश्वर्य
योगाद्युगपदनेककर्मसंबन्धीनि हवींषि भुञ्जीत तथापि विग्रहयोगादस्मदादिवज्जननमरणवती सेति नित्यस्य शब्द
स्य नित्येनार्थेन नित्यसंबन्धे प्रतीयमाने यद्वैदिके शब्दे प्रामाण्यं स्थितं तस्य विरोधः स्यादिति चेन्नायमप्यस्ति विरोधः कस्मा
दतः प्रभवात् अत एव हि वैदिकाच्छब्दाद्देवादिकं जगत्प्रभवति ननु जन्माद्यस्य यत इत्यत्र ब्रह्मप्रभवत्वं जगतोऽवधारितं
तत्कथमिह शब्दप्रभवत्वमुच्यते अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृ
तो यावता वसवो रुद्रा आदित्या विश्वे देवा मरुत इत्येतेऽर्था अनित्या एवोत्पत्तिमत्त्वात् तदनित्यत्वे च तद्वाचिनां वैदिकानां व
स्वादिशब्दानामनित्यत्वं केन निवार्यते प्रसिद्धं हि लोके देवदत्तस्य पुत्र उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियत इति तस्माद्वि

पान्नाद्यस्माद नायमर्थोऽस्तीति कर्मण्यविरोधवत् शब्देऽर्थः देवादिव्यक्तिहेतुत्वेन शब्दानां शब्दानां सत्त्वान्नानित्यत्वमितिभावः
अत्र पूर्वापरविरोधं शङ्कते ननु चेति शब्दस्य निमित्तत्वेन तत्तस्य सद्रूकाभिन्नादविरोध इत्याशङ्क्य द्वितीयं कल्प्यमुत्थापयति अपि चे
ति अनित्यत्वे स्यादित्वे व्यक्तिरूपार्थानामनित्यतया शब्दानां संबन्धस्यानित्यत्वं दुर्वारं तस्माच्छब्दस्य संबन्धस्य तन्नत्वात्प्रामाण्यवि
रोध इत्यर्थः न च व्यक्तीनामनित्यत्वेऽपि तद्वाचिशब्दानित्यसंबन्धत्वं चैतद्धि संबन्धोऽपि चैतदिति स्यादिति वाच्यं अयाचित संबन्ध
स्य अतत्त्वभावे स्थित्यभावेन दृष्टान्ता सिद्धेरिति भावः

स्फो॰
भा॰
९१

सोऽयं प्रकारः निरस्तः भिन्नपदार्थत्वे निमित्तविशेषस्यानुपपत्तिरित्याह उत्पन्नेति नाशात्मसंस्कारादिविरुद्धधर्मवत्त्वेन तत्तद्वर्णभेदसंयोग
कारः तिरोभावप्रकारः स्वभेदाद्भासमानान्यमपि तारतम्यानि विषयत्वमर्थः नन्वविरुद्धधर्मतानां धर्मधर्मिकल्पनमस्त्वत आह
नचेति तथा च वर्णानां नित्यत्वात् तत्तद्भेदनिमित्तभावः किंच तेषामर्थबोधकत्वे प्रत्येकं स्फोटाभिव्यञ्जकत्वमस्त्वित्याह नच वर्णेभ्य
इत्यादिना व्यभिचारादेकस्माद् वर्णादर्थप्रतीत्यदर्शनात् वर्णानां प्रत्येकमर्थप्रत्यायकत्वमसंभवीत्यर्थः ननु वर्णानां समुदाय एव बोधकः स्यादित्याशङ्क
ते तत्काले वर्णानां समुदायासंभवान्नेत्याह नचेति वर्णानामसततः साहित्याभावेऽपि संस्कारद्वारा पूर्वपूर्ववर्णसाहित्यं संभवतीत्याशङ्क्य दूषयति
शङ्कते स्वेति किमयं संस्कारो वर्णजनितो भवति उत कश्चित् तद्वर्णानुभवजनितो भावनाख्यः नाद्यः प्रमाणाभावात् किंच
यमन्त्यो वर्णोऽर्थधीहेतुः नाद्य इत्याह नचेति संस्कारसहितः सोऽन्त्यवर्णोऽर्थधीहेतुः संस्कारस्य वर्णधर्मत्वे तस्य बोधकत्वा
उपपत्तेः अन्त्यवर्णस्यैव सहकारित्वात् तथा प्रतीयमानत्वात् नचान्त्यवर्णस्योपलभ्यमानत्वे नियतपूर्वापरभावेन नियम
स्य तद्विशेषस्य निर्णीयते तद्वदन्त्यवर्णत्वं तदनन्तरं बोधकत्वमस्त्विति न चान्त्यवर्णविषयान्यथानुपपत्त्या मिथ्यात्वं वा
धकप्रमाणाभावात् नच वर्णाभ्यां तावत् निर्युक्तान्येकैकवर्णोऽर्थप्रत्यायकः व्यभिचारात् नच वर्णसमुदायः प्रत्या
यकोऽक्रमवत्त्वात् वर्णानां पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थप्रत्यायक इति यदुच्यते तदसंभवि
पूर्वस्मरणे स्वाहि श्रुतः स्वयं प्रतीयमानोऽर्थप्रत्यायकः प्रमादिवत् नच पूर्वपूर्ववर्णानुभवजनितसंस्कारसहित
संस्कारवर्णास्य प्रतीतिरस्य प्रत्यक्षत्वात् संस्काराणां कार्यप्रमाणैः संस्कारैः सहितोऽन्त्यवर्णः प्रत्यायक इति चेत् न
संस्कारकार्यस्मृतिविषयवर्णानामक्रमवर्तित्वात् तस्मात् स्फोट एवेत्याह
सुमादिवदित्यर्थः द्वितीये किं प्रत्यक्षेण तानु तत्कार्यलिङ्गेनानुमानेन वा आद्य इत्याह नचेति द्वितीयशङ्कते कार्येति कार्यमर्थधीस्तत्संस्कारा
संस्कारप्रत्ययः तस्मिन् सत्यनेन नियतपरस्पराश्रयेण दूषयति नेति पदार्थस्मरणस्यापि पदज्ञानानन्तरभावित्वात् तत्संस्कारसहितोऽन्त्य
वर्णस्तत्कार्यपदस्मरणस्यानुकूलमिति तदर्थः अपि चाह परस्पराश्रय एवात्रार्थः एतेन भावनासंस्कारपक्षोऽपि निरस्तः तस्य वर्ण
स्मृतिमात्रहेतुत्वेनार्थधीहेतुत्वायोगात् नचान्त्यवर्णसाहित्यमर्थधीहेतुत्वं केवलसंस्कारस्य तु वर्णस्मृतिहेतुत्वमिति वा
च्यं अर्थधीपूर्वकाले भावनाया तत्तद्भावेनार्थधीहेतुत्वायोगात् नच वर्णस्मरणेनानुमिताः संस्कारा वर्णसहिता अर्थधीहेतव इति
वाच्यं तत्कार्यस्य क्रमिकस्य वर्णस्मरणस्यापि अन्त्यवर्णानुभवानन्तरभावित्वेन तेनानुमितभावनानां तत्संस्कारसाहित्याभावादि
तिभावः वर्णानामर्थबोधकत्वासंभवे फलमाह तस्मादिति ॥ ९१

शब्दो निमित्तमित्यविरोधमत्वात्तत्र शोधमवतारयति कथं पुनरिति स्पष्टार्थमात्मानं मूलकृतिरत्नमीयतइत्यमानं स्मृतिः
एते असृग्रमिन्दव इति रः पवित्रमाशवः विश्वान्यभि सौभगेत्यन्तं मन्त्रस्थैः पदैः स्मृत्वा ब्रह्मा देवादीनसृजत् तदेतदितिपदैः सर्वे नामत्वा
देवानां स्मारकं असृग्रमित्यपि तत्प्रधाने देवे मनुष्याः चेरस्थानां पितृणां इन्दुशब्दः स्मारकः पवित्रं सोमं सोतनविंरकुर्वतां
ग्रहाणां तिरविश्रशब्दः अरधोऽस्तुवतां स्तोत्राणामितीति स्तुतिकर्मणां शब्दः स्मृतिप्रत्यपदेशमिरात्रैः स्तोत्रानन्तरं प्रयोगं विशतां शस्त्रा
णां विश्वशब्दः सर्वत्र सौभगपद्मानामसिषो भगशब्दः स्मारकः इत्यर्थः इन्द्रत्वनाष्टावर्थः सप्रजापतिः मनसा वा चेत्रयीम
पश्यत्समभवत् मनोवागन्ययमिथुनेऽभावित्यत्र नेत्रयी प्रकाशितास्तु हि मात्रेति च ताभ्यां अथ रश्मिरितिवादिसृजन
कथं पुनर्वचनमित्येतदत्यपमतिर्जसीति मत्यतोऽनुमानाभ्यां प्रकृतेः प्रामाण्यप्रदर्शनत्वात् श्रुत्युनुमानेस्स्मृ
तिः प्रामाण्यमतिसाधनत्वात् तदिह शब्दपूर्वकत्वं सृष्टेः श्रोत्रतः एतदिति प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव
इति पितॄंस्तिरः पवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रं अभिसौभगेत्यन्याः प्रजा इति श्रुतेः तथान्यत्रापि स मन
सा वाचं मिथुनं समभवदित्यादिना तत्र तत्र शब्दपूर्विका सृष्टिः श्रुता इति स्मृतिरपि अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भु
वा आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय इति उत्तमोऽत्र वाचः सम्प्रदायप्रवर्तनात्मकोऽनुभवः अनादिनिधना या श्रुत्या
दृष्टास्तस्यास्सम्भवात् तथा नामरूपं च भूतानां कर्मणां च प्रवर्तनं वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति सर्वेषां तु स न
मानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इति अपि च चिकीर्षितमर्थं मनसा निश्चित्य तद्वाचकं शब्दं पूर्वं
स्मृत्वा पश्चात्तमर्थं मनुष्यः सृजतीति सर्वेषां नः प्रत्यक्षमेतत् तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभू
वुः पश्चात्तदनुगतानर्थान्ससर्जेति गम्यते तथा च श्रुतिः स भूरिति व्याहरन् स भूमिमसृजतेत्येवमादिका भूरादीनेव
मनसि प्रादुर्भूतेभ्यो भूरादिलोकान्सृष्टान्दर्शयति किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते स्फोटमित्याह वर्णा
एव हि तेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभवस्तन्नुपपन्नं स्यात्
नेत्यादि अनित्यादिशब्दार्थः संप्रदायोऽनुच्छिन्नस्तस्य नित्यत्वं स्यात् यावत्प्रजापतिः सृष्टेः प्राक् प्रवृत्तिकारणत्वात् प्रत्यक्ष
घटादिवदिति प्रत्यक्षेणानुमानेनाभिमतार्थोऽन्तर्भावः अपि चेति अतः प्रभवत्वं समर्थं कृतं स्वरूपं च कुतः मात्रमिति किं
मात्मकमिति वर्णात्मकत्वेति स्फोटरूपं चेति किं तात्पर्यार्थः तत्त्ववर्णानामनित्यत्वात् तथा चायमर्थः ततो इत्यत्र स्मृत्यादि
नीयपदं वैयाकरणोऽनुदाहृति स्फोटमिति सूत्रानुगतं शब्दं ज्ञातिस्फोटवर्णाभिव्यक्तिं स्फोटाकारानवादिना नेति तमभिप्रेत्य

शा
भा
६२

भेदप्रत्ययस्य कुंभरूपकाशभेदप्रत्ययवदौपाधिकभेदविषयत्वादन्यथासिद्धेः अन्यथासिद्धत्वेनैकत्वप्रत्यभिज्ञया निरपेक्षस्वरूप
त्वबलवत्वाबाधकमितरमाह अन्येति नात्यादिदेशेः कोष्ठस्थवायुसंयोगविभागाभ्यां विचित्राभ्यां अभिव्यक्तत्वात् वर्णेष्वपि वैचित्र्यधीरित्यर्थः
कल्पनागौरवाच्च वर्णेष्वतो भेदो नास्तीत्याह अपि चेति अनेकाः गकारादिव्यक्तयस्तासु प्रत्यभिज्ञानार्थं गत्वादिजातयस्तास
चोदात्तत्वादिभेदस्यौपाधिकत्वमिति कल्पना तु वर्णव्यक्तिभेदमात्रस्यौपाधिकत्वकल्पनमिति अस्माकं लघ्वनादीनां च कल्प
नमयुक्तमित्यर्थः ननु भेदस्य बाधकाभावादौपाधिकत्वमित्यत आह एवं इति अनुस्वनदितप्रत्ययद्वयसामान्यविशेषभेदाभेदयोः
समत्वं तत्राह कथं हीति उभयोरेकत्र विरोधात् भेदं औपाधिक एवेत्यर्थः ननु वायुसंयोगादेरतीन्द्रियत्वान्न तद्गतवैचित्र्यमादाय

अत्राभिधीयते सति वर्णविषये निश्चिते प्रत्यभिज्ञाने संयोगविभागाभिव्यंग्यत्वाद्गत्वादीनामभिव्यंजकवैचित्र्यनिमित्तोयं
वर्णविषयो विचित्रः प्रत्ययो न स्वरूपनिमित्तः अपि च वर्णव्यक्तिभेदवादिनापि प्रत्यभिज्ञानसिद्ध्यर्थं वर्णाकृतयः कल्प
यितव्याः तासूपरागोपाधिको भेदप्रत्यय इत्यभ्युपगन्तव्यं तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः स्वरूपनिमित्तं च प्रत्य
भिज्ञानमिति कल्पनालाघवं एवं च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्ययो यत्प्रत्यभिज्ञाने कथं ह्येकस्मिन्काले
बहूनामुच्चारयतामेक एव सन्नकारो युगपदनेकरूपः स्यात् उदात्तश्चानुदात्तश्च स्वरितश्च सानुनासिकश्च निरनुना
सिकश्चेति अथवा ध्वनिकृतोयं प्रत्ययभेदो न वर्णकृत इत्यदोषः कः पुनरयं ध्वनिर्नाम यो हि दूरादाकर्णयतो वर्णविवेक
मप्रतिपद्यमानस्य कर्णपथमवतरति प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासंजयति तन्निबंधनाश्चामी नादयो विशेषा
न वर्णस्वरूपनिबंधनाः वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात् ॥

त्वादेर्वर्णेषु प्रसक्तारोपः संभवतीत्यरुचिवदिष्यन्त्यमतमाह अथवेति ध्वनिर्यत उदात्तत्वाद्युपभेदाभासो हि वर्णेषु भाती
